नं० १९

सिद्धान्त कौमुदी दशानण

दशप्रक्रिया पत्राणि ३६ ततः ७४

पर्य्यन्तम् = ३९ पत्राणि

नं० १९

सिद्धान्तकौमुदी दशगणस्य दशप्रक्रिया

पत्राणि ३६तः ७४ = ३९

१९

(३६ — ७४)
३८ पत्राणी

३६ से ७४ तक
कुल ३९ पत्र

74
36/38

नं० १९

सिद्धान्तकौमुदी दशानण दशप्रक्रिया

पत्राणि ३६ तः ७४ पर्य्यन्तम् = ३९ पत्राणि

उदेतो:॥ विस्रप:॥ अव्ययीभावश्च॥ अधिहरि॥ अव्ययादाप्सुप:॥ अव्यया(द्धा
तस्यापःसुपश्चलुक्॥ तत्र शालायां॥ अयविहितवि(शे)षणान्नेह॥ अमुच्चैःसो॥
अव्ययसंज्ञायां यद्यपि तदं(त)विधिरस्ति तथापि न गौणे॥ आपृथग्रहणं व्यर्थं॥ अ
व्ययस्यालिंगत्वात्॥ तथा च श्रुतिः॥ सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु॥
वचनेषु च सर्वेषु यन्न व्येति तदव्ययं॥१॥ वष्टि भागुरिरल्लोपमवाप्योरुपस
र्गयोः॥ आपं चैव हलंतानां यथा वाचा निशा दिशा॥२॥ वगाहः॥ अवगाहः॥
पिधानं॥ अपिधानं॥ ॥इत्यव्ययानि॥ ॥इति सुबंतसमाप्तं॥ श्रीहरि॥
॥श्रीगणेशाय नमः॥ लट्॥ लिट्॥ लुट्॥ लृट्॥ लेट्॥ लोट्॥ लङ्॥ लिङ्॥ लु
ङ्॥ लृङ्॥ एषु पंचमो लकारश्छंदोमात्रगोचरः॥ लः कर्मणि च भावे चाकर्मकेभ्यः॥
लकाराः सकर्मकेभ्यः कर्मणि कर्त्तरि च स्युरकर्मकेभ्यो भावे कर्त्तरि च॥ वर्त्तमाने लट्॥

वर्तमानक्रियावृत्तेर्धातोर्लट्स्यात्॥ अटावितौ उच्चारणसामर्थ्यात्लस्य नेत्वं॥ भू सत्तायां॥ कर्तृवि
वक्षायां भूल् इति स्थिते॥ तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्॥
॥ एतेऽष्टादश लादेशाः स्युः॥ लः परस्मैपदं॥ लादेशाः परस्मैपदसंज्ञाः स्युः॥ तङानावात्मनेपदं॥ तङ्
प्रत्याहारः शानच्कानचौ चैतत्संज्ञाः स्युः पूर्वसंज्ञापवादः॥ अनुदात्तङित आत्मनेपदं॥ अनु
दात्तेत उपदेशे यो ङित्तदन्ताच्च धातोर्लस्थाने आत्मनेपदं स्यात्॥ स्वरितञितः कर्त्रभिप्राये
क्रियाफले॥ स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात् कर्तृगामिनि क्रियाफले॥ शेषात्कर्त
रि परस्मैपदं॥ आत्मनेपदनिमित्तहीनाद्धातोः कर्तरि परस्मैपदं स्यात्॥ तिङस्त्रीणि त्रीणि
प्रथममध्यमोत्तमाः॥ तिङ उभयोः पदयोस्त्रयस्त्रिकाः क्रमादेतत्संज्ञाः स्युः॥ तान्येकवच
नद्विवचनबहुवचनान्येकशः॥ लब्धप्रथमादिसंज्ञानि तिङस्त्रीणि त्रीणि प्रत्येकमेक
वचनद्विवचनबहुवचनसंज्ञानि स्युः॥ युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि म

अनद्यतने लङ्॥ अनद्यतनभूतार्थवृत्तेर्धातोर्लङ् स्यात्॥ लुङ्लङ्लृङ्क्ष्वडुदात्तः॥
एष्वंगस्याट् स्यात्॥ इतश्च॥ ङितो लस्य परस्मैपदमिकारांतं यत्तस्य लोपः॥ अभवत्॥
अभवतां॥ अभवन्॥ अभवः॥ अभवतं। अभवत॥ अभवं। अभवाव। अभवाम॥
विधिनिमंत्रणामंत्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्॥ एष्वर्थेषु धातोर्लिङ्॥ यासुट्प
रस्मैपदेषूदात्तो ङिच्च॥ लिङः परस्मैपदानां यासुडागमो ङिच्च॥ ङित्वोक्त्या ज्ञायते क्वचि
दनुबंधकार्येप्यनल्विधाविति प्रतिषेध इति तेन वक्ष्यमाणोत्वं च ङीपून॥ लिङः सलोपो
नंत्यस्य॥ सार्वधातुकलिङोनंत्यस्य सस्य लोपः॥ इति प्राप्ते॥ अतोयेयः॥ अतः परस्य सा
र्वधातुकावयवस्य यास इत्यस्य इय् आदेशः॥ लोपो व्योर्वलि॥ भवेत्॥ भवेतां॥ झेर्जुस्
लिङः॥ भवेयुः। भवेः। भवेतं। भवेत। भवेयं। भवेव। भवेम। लिङाशिषि॥ आशिषि लि
ङस्तिङार्धधातुकसंज्ञः॥ किदाशिषि॥ आशिषि लिङो यासुट् किद् स्यात्॥ स्कोरिति

पाठस्ये...

२८ सलोपः॥ क्ङिति च॥ गितकितङिन्निमित्ते इग्लक्षणयोगुणवृद्धीनस्तः॥ भूयात्। भूयास्तां। भूयासुः। भूयाः। भूयास्तं। भूयास्त। भूयासं। भूयास्व। भूयास्म॥ लुङ्॥ भूतार्थवृत्तेर्धातोर्लुङ्॥ माङि लुङ्॥ सर्वलकारापवादः॥ स्मोत्तरे लङ् च॥ स्मोत्तरे माङि लुङ् स्याल्लङ् च॥ च्लि लुङि॥ शबाद्यपवादः॥ च्लेः सिच्॥ गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु॥ एभ्यः सिचो लुक्॥ गापाविहेणादेशपिबतीगृह्येते॥ भूसुवोस्तिङि॥ भूसु एतयोः सार्वधातुके तिङि गुणो न॥ अभूत्। अभूतां। अभूवन्। अभूः। अभूतं। अभूत। अभूवं। अभूव। अभूम॥ न माङ्योगे॥ अडाटौ नस्तः॥ मा भवान् भूत्। मा स्म भवत्। मा स्म भूत्॥ लिङ्निमित्ते लृङ् क्रियातिपत्तौ॥ हेतुहेतुमद्भावादि लिङ्निमित्तं तत्र भविष्यत्यर्थे धातोर्लृङ् क्रियाया अनिष्पत्तौ गम्यमानायां॥ अभविष्यत्। अभविष्यतां। अभविष्यन्। अभविष्यः। अभविष्यतं। अभविष्यत। अभविष्यं। अभविष्याव। अभविष्याम॥ सुवृष्टिश्चेद भविष्यत्तदा सुभिक्षमभविष्यत्॥ इत्यादि ज्ञेयं। प्रभवतीत्यादौ उपसर्गाणां समस्तत्वेऽपि संहि

ध्यमः॥ तिङ्वाच्यकारकवाचिनि युष्मद्यप्रयुज्यमाने प्रयुज्यमाने च मध्यमः॥ अस्मद्युत्तमः॥ तथा
भूतेऽस्मद्युत्तमः॥ शेषे प्रथमः॥ मध्यमोत्तमयोरविषये प्रथमः॥ [illegible]
[illegible]॥ भू ति इति जाते॥ तिङ्शित्सार्वधातुकं॥ तिङः शितश्च धात्वधिकारोक्ता एतत्संज्ञाः
स्युः॥ कर्तरि शप्॥ कर्त्रर्थे सार्वधातुके परे धातोः शप्॥ सार्वधातुकार्धधातुकयोः॥
अनयोः परयोरिगन्तांगस्य गुणः॥ अवादेशः॥ भवति। भवतः॥ झोऽन्तः॥ प्रत्ययावयवस्य
झस्यान्तादेशः॥ अतो गुणे॥ भवंति। भवसि। भवथः भवथ। अतो दीर्घो यञि। अतोंग
स्य दीर्घो यञादौ सार्वधातुके॥ भवामि। भवावः॥ भवामः॥ स भवति। तौ भवतः। ते भवं
ति। त्वं भवसि। युवां भवथः। यूयं भवथ। अहं भवामि। आवां भवावः। वयं भवामः॥ शेषे
विभाषा कखादावषांत उपदेशे॥ उपदेशे कादिः खादिः षांतवर्जे गदनदादेरन्यस्मिन्
धातावुपसर्गस्थान्निमित्तात्परस्य नेर्णत्वं वा स्यात्॥ प्रणिभवति। प्रनिभवति। परोक्षे लिट्।

३९

भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट् स्यात् ॥ अस्य लस्य तिबादयः ॥ परस्मैपदानांणल
तुसुस्थलथुसणल्वमाः ॥ लिटस्तिबादीनां णलादयः स्युः ॥ भू अ इति स्थिते ॥ भुवो
वुग्लुङ्लिटोः ॥ अचि ॥ लिटि धातोरनभ्यासस्य ॥ लिटि परेऽनभ्यासधात्ववयव
स्यैकाचः प्रथमस्य द्वे स्त आदिभूतादचः परस्य तु द्वितीयस्य ॥ भूव् भूव् अ इति
स्थिते ॥ पूर्वोऽभ्यासः ॥ अत्र ये द्वे तयोः ॥ हलादिः शेषः ॥ अभ्यासस्यादिर्हल् शि
ष्यतेऽन्ये हलो लुप्यंते ॥ ह्रस्वः ॥ अभ्यासस्याचः ॥ भवतेरः ॥ भवतेरभ्यासो
कारस्य अः स्याल्लिटि ॥ अभ्यासे चर्च ॥ अभ्यासे झलां चरः स्युर्जशश्च ॥ झलां
जशः खयां चर इति विवेकः ॥ बभूव ॥ बभूवतुः ॥ बभूवुः ॥ लिट् च ॥ लिडादेश
स्तिङार्धधातुकसंज्ञः ॥ आर्धधातुकस्येड्वलादेः ॥ बभूविथ ॥ बभूवथुः ॥ बभू
व ॥ बभूव ॥ बभूविव ॥ बभूविम ॥ अनद्यतने लुट् ॥ भविष्यत्यनद्यतनेऽर्थे धातो

लुट्॥स्यतासीलृलुटोः॥ धातोरेतौस्तोलृलुटोः परतः शबाद्यपवादः॥ लृट्इतिलृ
ङ्लटोर्ग्रहणं॥ आर्द्धधातुकंशेषः॥ तिङ्शित्भ्योन्योधातोरितिविहितःप्रत्ययआर्द्ध
धातुकसंज्ञःस्यात्॥इट्। लुटः प्रथमस्यडारौरसः॥ डित्वसामर्थ्यादभस्यापिटेर्लो
पः॥ ~~भवितः~~ ~~...~~ ~~दीधीवेवीयां॥ दीधीवेव्योरिट...~~
~~दीनस्त॥ ...~~ ॥भविता॥ तासस्त्यो
र्लोपः॥ सादौप्रत्यये॥ रिच॥ रादौप्रत्ययेतथा॥ भवितारौ॥ भवितारः। भवितासि। भवितास्थः।
भवितास्थ। भवितास्मि। भवितास्वः। भवितास्मः॥ लृट्शेषेच॥ भविष्यदर्थाद्धातोर्लृट्क्रियार्था
यांक्रियायांसत्यामसत्यांच॥ स्यः इट्॥ भविष्यति। भविष्यतः। भविष्यंति। भविष्यसि। भविष्यथः।
भविष्यथ। भविष्यामि। भविष्यावः। भविष्यामः। लोट्च। विध्यादिष्वर्थेषुधातोर्लोट्॥ आशि
षिलिङ्लोटौ॥ एरुः॥ लोट्इकारस्यउः। भवतु। तुह्योस्तातङाशिष्यन्यतरस्यां॥ आशिषितुह्यो

स्तातङ्वा।परत्वात्सर्वादेशः।ननुङित्वेत्यस्यकावकाशइतिचेत्शृणु।अनन्यार्थङकारस्तुतातङ
दित्वितिगृहाण।।भवतात्।लोटोलङ्वत्।।लोटस्तामादयःसलोपश्च।।तस्यस्यमिपांतांतंतामः
।।ङितश्चतुर्णांतामादयःस्युः।।भवतां।भवंतु।।सेर्हिपिच्च।।लोटःसेर्हिःसोपिच्च।।अतोहेःलु
क्।।भव।भवतात्।भवतं।भवत।मेर्निः।।लोटः।।आडुत्तमस्यपिच्च।।लोडुत्तमस्याट्सोपिच्च।।
हिन्योरुत्वंन।।इकारोच्चारणसामर्थ्यात्।।भवानि।।तेप्राग्धातोः।।तेगत्युपसर्गसंज्ञाधातोः
प्रागेवप्रयोक्तव्याः।।आनिलोट्।।उपसर्गस्थान्निमित्तात्परस्यलोडादेशस्यानीत्यस्य
नस्यणःस्यात्।।प्रभवाणि।।दुरःषत्वणत्वयोरुपसर्गत्वप्रतिषेधोवक्तव्यः।।दुःस्थितिः।।
दुर्भवानि।।अंतःशब्दस्याङ्किविधिणत्वेषूपसर्गत्वंवाच्यं।।अंतर्भवाणि।।नित्यंङि
तः।।सकारांतस्यङितुत्तमस्यनित्यंलोपः।।अलोंत्यस्येतिसलोपः।।भवाव।भवाम।।

स

ता नित्या ॥ तदुक्तं । संहितैकपदे नित्या नित्या धातूपसर्गयोः ॥ नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥ सत्ताद्यर्थनिर्देशश्चोपलक्षणं ॥ यागात्स्वर्गो भवतीत्यादावुत्पद्यत इत्याद्यर्थात् । उपसर्गास्त्वर्थविशेषद्योतकाः ॥ प्रभवति । पराभवति । संभवति । अनुभवति । अभिभवति । उद्भवति । परिभवति इत्यादौ विलक्षणार्थावगतेः ॥ उक्तं च ॥ उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ॥ प्रहाराहारसंहारविहारपरिहारवत् ॥ अत सातत्यगमने ॥ अतति ॥ अत आदेः ॥ अभ्यासस्यादेरतो दीर्घः स्यात्पररूपापवादः । आत । आततुः । आतुः । आतिथ । आतथुः । आत । २ ॥ आतिव । आतिम ॥ अतिता । अतिष्यति । अततु आडजादीनां ॥ अजादेरंगस्याट् लुङ्लङ्लृङ्क्षु ॥ आतत् । अतेत् । अत्यात् । अत्यास्तां ॥ लुङ् सिचि इडागमे कृते ॥ अस्तिसिचोपृक्ते ॥ विद्यमानात्सिचोऽस्तेश्च परस्यापृक्तस्य हल ईडागमः ॥ इट ईटि । इटः परस्य सस्य लोपः स्यादीटि । सिज्लोप एकादेशे सिद्धो वाच्यः ॥ आतीत् ॥ आतिष्टां । सिजभ्यस्तविदिभ्यश्च ॥ सिचोऽभ्यस्ताद्विदेश्च परस्य ङित्संबंधिनो झेर्जुस् । आतिषुः । आतीः । आतिष्टं । आतिष्ट । आतिषं । आतिष्व । आतिष्म । आतिष्यत् । एवं अवरस्य

ण गतिकांतिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेछादीप्त्यवाप्त्यालिंगनहिंसा
दानभागवृद्धिषु॥ अवतीत्यादि॥ षिधु गत्यां॥ पुगंतलघूपधस्य च॥ पुगंतलघूपधस्य चां
गस्येको गुणः सार्वधातुकार्धधातुकयोः॥ धात्वादेः षः सः॥ सेधति। षत्वं। सिषेध। सेट्स्तृप
स्तृ स्तृह सृज स्तृह स्त्यान्ये दंत्याजंतसादयः॥ एकाचः षोपदेशाः ष्म ष्क स्विद् स्वद् स्वंज स्वप
स्मिङः॥ दंत्यः केवलदंत्यः षकारादीनां पकारग्रहणात्॥ असंयोगाल्लिट् कित्॥ असं
योगात्परोपि लिट् कित् स्यात्॥ सिषिधतुः। सिषिधुः। सिषेधिथ। सिषिधथुः। सि
षिध। सिषेध। सिषिधिव। सिषिधिम। सेधिता। सेधिष्यति। सेधतु। असेधत्। सेधे
त्। सिध्यात्। असेधीत्। असेधिष्यत्॥ सात्पदाद्योः॥ सस्य षो न॥ इति निषेधे प्राप्ते॥
॥ उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसंजस्वंजां॥ उप
सर्गस्थान्निमित्तादेषां सस्य षः॥ सदिरप्रतेः॥ प्रतिभिन्नादुपसर्गात्सदेः सस्य षः॥ स्तंभेः॥
स्तंभेः सौत्रस्य सस्य षः॥ अवाच्चालंबनाविदूर्ययोः॥ अवात्स्तंभेरेतयोरर्थयोः षः॥

वेष्टस्वनोभोजने॥ अवाभ्यांस्वनतेः सस्यषोभोजने॥ परिनिविभ्यः सेवसितसयसिबुसहसुट्स्तुस्वंजां॥ परिनिविभ्यः परेषामेषां सस्यषः॥ निषेधाति॥ प्राक्सितादड्व्यवायेपि॥ सेवसितेत्यत्र सितशब्दात् प्राग्ये सुनोत्यादयस्तेषामड्व्यवायेपि षत्वंस्यात्। न्यषेधत्। न्यषेधीत्॥ स्यादिष्वभ्यासेनचाभ्यासस्य॥ प्राक्सितात् स्यादिष्वभ्यासे नव्यवायेपि षत्वंस्यात्॥ एषामेवचाभ्यासस्य नतु सुनोत्यादीनां॥ निषिषेध॥ निषिषिधतुः॥ सेधतेर्गतौ॥ गत्यर्थस्य सेधतेः सस्यषो न॥ गंगांविसेधति॥ एवं चिती संज्ञाने श्रुच शोके॥ गदव्यक्तायांवाचि॥ गदति॥ नेर्गदनदपतपदघुमास्यतिहंतियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषुच॥ उपसर्गस्थान्निमित्तात् परस्यनेर्णः स्यात् गदादिषु परेषु॥ प्रणिगदति॥ कुहोश्चुः॥ अभ्यासकवर्गहकारयोश्चवर्गादेशः॥ अत उपधायाः॥ वृद्धिस्यात् ञिति णिति प्रत्यये परे॥ जगाद॥ जगदतुः॥ जगदुः॥ जगदिथ॥ जगदथुः॥ जगद॥ णलुत्तमो वा॥ णित्स्यात्॥ जगाद॥ जगद॥ जगदिव जगदिम॥

४१ गदिता। गदिष्यति। गदतु। अगदत्। गदेत्। गद्यात्। अतो हलादेर्लघोः। हलादेर्लघोरतो
वृद्धिर्वा इडादौ परस्मैपदे सिचि। अगादीत्। अगदीत्॥ अगदिष्यत्॥ णद अव्यक्ते शब्दे॥
णो नः॥ धात्वादेर्णस्य नः॥ णोपदेशास्त्वनर्द्राटिनाथ्नाधृनन्दनक्रनृन्तः॥ उपसर्गादसमा
सेपि णोपदेशस्य॥ उपसर्गस्थान्निमित्तात्परस्य णोपदेशस्य धातोर्नस्य णः स्यात्॥
प्रणदति। प्रणिनदति। नदति। ननाद॥ अत एकहल्मध्येनादेशादेर्लिटि॥ लि
ण्निमित्तादेशादिकं न भवति यदंगं तदवयवस्यासंयुक्ताहल्मध्यस्यस्यात एत्वम
भ्यासलोपश्च किति लिटि। नेदतुः। नेदुः॥ थलि च सेटि॥ इडुति थलि च प्रागुक्तं स्या
त्। नेदिथ। नेदथुः। नेद। ननाद। ननद। नेदिव। नेदिम। नदिता। नदिष्यति। नदतु।
अनदत्। नदेत्। नद्यात्। अनादीत्। अनदीत्। अनदिष्यत्। श्रुतिरुदरले।
ऋदृ इत्संज्ञा वाच्या। श्रोतति। शर्पूर्वाः खयः॥ अभ्यासस्य शर्पूर्वाः खयः शिष्यंते

न्येहलोलुप्यंते॥हलादिः शेषापवादः॥चुश्च्योत। इदितो वा॥इदितो धातोर्नुम्‌स्यात्‌ परस्मैपदेषु। अश्चुतत्‌॥अश्च्योतीत्‌॥यकाररहितोप्ययं। श्चोतति। चुश्चोत। अश्चुतत्‌। अश्चोतीत्‌। च्युतिर्‌ आसेचने॥च्योतति। टुनदि समृद्धौ। आदिर्ञिटुडवः॥उपदेशे धातोराद्या एते इतः स्युः॥इदितो नुम्‌ धातोः। नंदति। ननंद। नंदिता। नंदिष्यति। नंदतु। अनंदत्‌। नंदेत्‌। इदित्वान्न लोपो न। नंद्यात्‌। अनंदीत्‌। अनंदिष्यत्‌। एवं कुथि पुथि लुथि मथि मंथ हिंसासंक्लेशनयोः॥बिदि अवयवे। भिदीति पाठांतरं। गदि वदनैकदेशे। चदि आल्हादे। त्रदि चेष्टायां। क्रदि क्लदि आह्वाने रोदनैः। क्लिदि परिदेवने। तक्रि ह कृच्छ्रजीवने। पुगि बुगि जुगि वर्जने। मथि मंडने। शिघि आघ्राणे। मंथ विलोडने। मंथति। ममंथ। कित्वान्नलोपः। मथ्यात्‌। अर्च पूजायां। अर्चति। तस्मान्नुड्‌ द्विहलः॥द्विहलो धातोर्दीर्घीभूतादतः परस्य नुट्‌ स्यात्‌। आनर्च। आनर्चतुः। अर्चिता। अर्चिष्यति। अर्चतु। आर्चत्‌। अर्चेत्‌। अर्च्यात्‌। आर्चीत्‌। आर्चिष्यत्‌। एवं

च

४२. अर्दगतौयाचनेच॥ अति अदि बंधने। वनषणसंभक्तौ। वनति। ववान। न शसददवादिगु
णानां॥ शसेर्ददेर्वकारादीनां गुणशब्देन विहितो योऽत् तस्य च एत्वाभ्यासलोपौ न॥ वव
नतुः॥ सनति। ससान। सेनतुः॥ ये विभाषा। जनसनखनामात्वं वा यादौ क्ङिति॥ सायात्।
सन्यात्॥ व्रज गतौ। व्रजति। वव्राज। व्रजिता। व्रजिष्यति। व्रजतु। अव्रजत्। व्रजेत्। व्रज्या
त्॥ वदव्रजहलंतस्याचः॥ एषामचो वृद्धिः सिचि परस्मैपदेषु॥ अव्राजीत्। अव्रजि
ष्यत्। कटे वर्षावरणयोः॥ कटति। चकाट। कटिता। कटिष्यति। कटतु। अकटत्।
कटेत्। कघात्। हम्यंतक्षणश्वसजागृणिश्व्येदितां॥ हमयांतस्य क्षणादेर्ण्यंतस्य श्वयते
रेदितश्च वृद्धिर्नेडादौ परस्मैपदे सिचि॥ अकटीत्। अकटिष्यत्॥ गुपू रक्षणे॥ गुपू
धूपविच्छिपणिपनिभ्यः आयः॥ स्वार्थे॥ सनाद्यंता धातवः॥ सनादयः कमेर्णिङिताः
प्रत्ययाः ऽपंते ये वांते धातुसंज्ञकाः॥ सन् क्यच् काम्यच् क्यङ् [illegible] क्यषो याचारक्वि
प् णिज्यङौ तथा॥ यगाय ईयङ् णिङ् चेति द्वादशामी सनादयः॥ धातुत्वाद्धडादयः॥

x सनाद्यंता धातव इत्यस्यानंतरं भ्वादय इत्येव सूत्रयितुं युक्तं

गोपायति। आयादय आर्धधातुके वा॥ आर्धधातुकविवक्षायामायादयः स्युः॥ कास्यनेकाच आम् वक्तव्यः॥ लिटि कास् आम् विधानमस्यनेत्वं॥ अतो लोपः॥ आर्धधातुकोपदेशे यदकारांतं तस्यातो लोपः आर्धधातुके। आमः॥ आमः परस्य लुक्॥ कृञ्चानुप्रयुज्यते लिटि॥ आमंताल्लिट्परा कृभ्वस्तयोनुप्रयुज्यंते॥ तेषां द्वित्वादि। उरत्। अभ्यासस्योरदंतः। हलादिः। गोपायांचकार॥ द्वित्वात्परत्वाद्यणि प्राप्ते॥ द्विर्वचनेऽचि॥ द्वित्वनिमित्तेचि अच आदेशो न द्वित्वे कर्तव्ये॥ गोपायांचक्रतुः। गोपायांचक्रुः॥ एकाच उपदेशेनुदात्तात्॥ उपदेशे यो धातुरेकाजनुदात्तश्च ततः आर्धधातुकस्येण्न॥ ऊदृदंतैर्यौतिरुक्ष्णुशीङ्स्नुनुक्षुश्विडीङ्श्रिभिः॥ वृङ्वृञ्भ्यां च विनैकाचोऽजंतेषु निहताः स्मृताः॥ कांतेषु शक्लृ एकः॥ चांतेषु पच्मुच्रिच्वच्विच्सिचः षट्॥ छांतेषु प्रच्छ एकः॥ जांतेषु त्यज्निजिर्भुज्भंज्भज्मस्ज्मस्ज्यज्युज्रुज्रंज्विजिर्स्वंज्सज्सृजः पंचदश॥ दांतेषु अद्क्षुद्खिद्छिद्तुद्नुद्पद्भिद्विद्विनुद्विद्

शाद् सद् स्विद् स्कंद् हद् इः षोडश॥ धांतेषु क्रुध् क्षुध् शुध् बुध् युध् व्यध् राध् साध् सिध्या एकादश॥ नांतेषु मन्य हन्नो द्वौ॥ पांतेषु आप् दिप् क्षुप् तप् तिप् तृप्
दृप्यो लिप् लुप् वप् शप् स्वप् सृप् त्रयोदश॥ भांतेषु यभ रभ लभस्त्रयः॥ मांतेषु ग
म्यमनमनमश्चत्वारः। शांतेषु क्रुश दश दिश दृश मृश रिश रुश लिश विश स्पृ
शो दश॥ षांतेषु कृष् त्विष् तुष् द्विष् दुष् पुष् पिष् विष् शिष् शुष् श्लिष्या एकाद
श॥ सांतेषु घस वस ती द्वौ॥ हांतेषु दह दिह दुह नह मिह रुह लिह वहोष्टौ॥
अनुदात्ता हलंतेषु धातवस्त्र्यधिकं शतं॥ गोपायांचकर्थ। गोपायांचक्रथुः
गोपायांचक्र। गोपायांचकार। गोपायांचकर। गोपायांचकृव। गोपायांचकृम
गोपायांबभूव। गोपायामास। [illegible] जुगोप। जुगुपतुः। जुगुपुः॥ [illegible]रति स्तृति
स्मृति धृङ् दितो [illegible]॥ स्वरत्यादेरू दित श्चपरस्य बलादेरार्द्धधातुकस्येड्वा॥

जुगोपिथ॥ जुगोप्य॥ जोपयिता॥ गोपिता॥ गोप्ता॥ गोपायिष्यति॥ गोपिष्यति॥ गो
प्स्यति॥ गोपायतु॥ इप गोपायत्॥ गोपायेत्॥ गोपाय्यात्॥ गुप्यात्॥ इप गोपा
यीत्॥ नेटि॥ इडादौ सिचि हलंतलक्षणा वृद्धि नो॥ इप गोपीत्॥ इप गोप्सीत्॥ ग
प्लोः॥ ...॥ झलः परस्य सस्य लोपस्यात् झलि॥ इप गोप्तां॥ अगोप्सुः॥ इप गोप्सीः॥ इप
गोप्तं॥ इप गोप्त॥ इप गोप्सं॥ इप गोप्व॥ इप गोप्स्म॥ इप गोपायिष्यत्॥ इप गोपिष्य
त्॥ इप गोप्स्यत्॥ क्षिक्षये॥ क्षयति॥ चिक्षाय॥ चिक्षियतुः॥ चिक्षियुः॥ एकाच इति नि
षेधे प्राप्ते॥ ...॥ सनबसतु कुसुवो लिटि॥ क्रादिभ्य एव लिटि इट् एनस्यात् अन्यस्मात् दनिटो
पि स्यात्॥ इप चक्षा स्वरात्यनियो निटि॥ उपदेशे जंतो यो धातुस्तत्तासौ नित्यानिट्
ततः परस्य थल इट् एनं॥ उपदेशे त...॥ उपदेशे इप कारवंतस्तासौ नित्यानिट
परस्य थल इड्न॥ ...तिभारद्वाजस्य॥ तासौ नित्यानिट्स्सद्देता देवथलो नि
ट् भारद्वाजस्य मते॥ तेनान्यस्य स्यादेव॥ इप मम चरं ग्रहः॥ इप अजंतो कारवान्या

४४

यत्तास्त्व निरष्यलिवेदयं॥ क्ष दंतईदृङ्-नित्यानिरू:क्षेध ज्योलि दिसे दुवे त्॥ १॥ चिन्त्यपि यत्तास्य निरष्यलि वेदय्य॥ चिसेथ्या चिन्तायथुः॥ चिन्तया॥ चिन्तायाः॥ चिन्तया॥ चिन्तयिव॥ चिन्तयि॥ ॥सेता॥ सेव्य थ्य॥ चिन्तेथ्यो चिन्ताय थुः॥ चिन्तय॥ चिन्ताय॥ चिन्तया॥ चिन्तयिव॥ चिन्तयि॥ सेता॥ सेव्य ति॥ न्तयतु॥ ऽप न्त्ययता॥ न्तयेत्॥ कृत्सार्वधातुकयोर्दीर्घः॥ ऽपजंता गस्य गस्य दीर्घो या दीप्रत्ययेन न तु कृत्सार्वधातुकयोः॥ दीयातूनि चिवृद्धिः परस्मैपदे॥ इगंता गस्य वृद्धिः परस्मैपदे सिचि॥ ऽपसोपीता॥ ऽपसेप्यत्॥ तपसतापे॥ तपति॥ ततापा॥ तेपतुः॥ तेपुः॥ तेपिथ॥ ततप्त॥ तप्ता॥ तप्स्यति॥ तपतु॥ ऽपतपत्॥ तपेत्॥ तप्यात् ऽपता श्रीत्॥ ऽपता प्ता॥ ऽपतप्स्यत्॥ निसस्तपतावानासेवने॥ षः स्यात्॥ ऽपासेव नेपोनः पुन्यं तता न्यस्मिन् विषये॥ निष्टपति॥ क्रमुपादविक्षेपे॥ भ्राशभ्लाश भ्रमुक्रमुक्लमु॥ त्रसि त्रुटि लष॥ ऽभ्यः श्यन्वा कर्तरि सार्वधातुके॥ पक्षे शप्॥ क्रमः परस्मैपदे॥ क्रमेर्दीर्घः परस्मैपदेशिति॥ क्रामति॥ क्रामति॥ चक्राम॥ स्नुक्रमो रनात्मनेपदनिमित्ते॥ ऽपवैवेट्॥ क्रमिता॥ क्रमिष्यति॥ क्राम्यतु॥ क्रमतु॥ अक्रामत्॥

अकामत॥ काम्येत। कामेत। कम्यात्। अचकमीत्॥ अचकमिष्यत्॥ चमु छमु जमु झमु अदने॥ ष्ठिवुक्लमुचमां शिति॥ अचो दीर्घः स्यात्॥ आङि चम इति वक्तव्यं॥ आचामति॥ आङः किं। चमति विचमति। अचमीत्॥ स्खल संचलने॥ चस्खाल॥ अतो ल्रान्तस्य॥ अतः समीपो यो लो रो वा तदन्तस्याङ्गस्यातो वृद्धिः स्यात्परस्मैपदे सिचि॥ अस्खालीत्॥ त्सर छद्मगतौ। अत्सारीत्॥ पा पाने॥ पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्छधौशीयसीदाः॥ पादीनां पिबादयः स्युरित्संज्ञकशकारादौ प्रत्यये॥ पिबादेशोऽदन्तस्तेन न गुणः॥ आत औ णलः॥ पपौ। आतो लोप इटि च॥ अजाद्योरार्धधातुकयोः क्ङिदिटोः परयोरातो लोपः॥ पपतुः। पपुः। पपिथ। पपाथ। पपथुः। पप। पपौ। पपिव। पपिम। पाता। पास्यति। पिबतु। अपिबत्। पिबेत्। एर्लिङि। घुसंज्ञानां मास्थागोपाजहातिसां च एत्वमार्धधातुके किति ङिति। पेयात्। गातिस्थेति सिचो लुक्॥ अपात्। अपातां। आतः॥ सिज्लुकि आदन्तादेव झेर्जुस्। उस्यपदान्तात्। अपदान्तादकाराद् उसि पररूपमेकादेशः। अपुः। अपास्यत्॥

ग्लै म्लै हर्षक्षये ॥ ग्लायति ॥ आदेच उपदेशेऽशिति ॥ उपदेशे एजंतस्य धातोरात्वं न तु शिति ॥
जग्लौ ॥ ग्लाता । ग्लास्यति । ग्लायतु । अग्लायत् । ग्लायेत् ॥ वान्यस्य संयोगादेः ॥ घुमास्थादेर
न्यस्य संयोगादेर्धातोरात एत्वं वाऽऽर्धधातुके किति लिङि । ग्लेयात् । ग्लायात् ॥ यमरमनमातां स
क् ॥ एषां सगेभ्यः सिच इट् परस्मैपदेषु ॥ अग्लासीत् । अग्लास्यत् । एवं म्लायतीत्यादि
धेट् पाने । धयति । दधौ । दाधा घ्वदाप् ॥ दारूपा धारूपाश्च धातवो घुसंज्ञाः स्युः । दाप्
दैपौ विना । धेयात् । विभाषा धेट्श्व्योः । आभ्यां णेश्चङ् वा । चङि । अनभ्यासस्य धात्व
वयवस्य प्रथमस्यैकाचो द्वे स्तो जादेस्तु द्वितीयस्य । अदधत् । अदधतां । अदध
न् ॥ विभाषा घ्राधेट्शाच्छासः । एभ्यः सिचो लुग्वा परस्मैपदेषु ॥ अधात् । अधा
तां । अधुः । पक्षे इट्सकौ ॥ अधासीत् । अधासिष्टां । द्यै न्यक्करणे । द्यायति ॥
द्रै स्वप्ने ॥ द्रायति ॥ ध्रै तृप्तौ । ध्रायति । ध्यै चिंतायां । ध्यायति । रै शब्दे । रायति । स्त्यै
ष्ट्यै शब्दसंघातयोः ॥ स्त्यायति ॥ षोपदेशस्यापि सत्वे कृते रूपं तुल्यं । षोपदेशफलं

उतिष्ठासती। भविष्यति। खे खदने। दोजे बैदाये। सावति। घुमास्थेतीत्वं न विना धात्रा घोडि न च यस्य तेरेव ग्रहणं। नत्यस्य तेन इत्वं सिज्लुकौ न। सायात्। असासीत् ॥ कै गै रै शब्दे। शोश्रेघाके पे श्रो वै शोषणे। पायात्। अपासीत्। घुमास्थेतीत्वं तदपवादत्वात् लिङि न त्वेत्वं गातिस्थेति सिज्लुक् च न। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमिति पान्न्यस्य लाक्षणिकत्वात्। देङ् शोधने। दायति। अघु त्वादेत्वं सिज्लुकौ न। दायात्। अदासीत्। घ्राङ् गंधोपादाने। जिघ्रति। घ्रायात्। घ्रेयात्। अघ्रासीत्। अघ्रात्। ध्मा शब्दाग्निसंयोगयोः। धमति। ष्ठा गतिनिवृत्तौ। तिष्ठति। स्थादिष्विति षत्वं। अधितष्ठौ। उपसर्गादिति षत्वं। अधिष्ठाता। स्थेयात्। सत्वेऽक्तेऽप्यक्रुतिस्तवर्गः स्यात् नणारजावनुस्वारपंचमौ झलि धातुषु। सकारजः शकारश्चेषाद्दवर्गस्तवर्गजः। १। सिचो लुक्। अस्थात्। म्ना अभ्यासे। मनति। दाण् दाने। प्रणियच्छति। ह्वृ कौटिल्ये। ह्वरति। ऋतश्च संयोगादेर्गुणः। ऋदंतस्य संयोगादेरंगस्य गुणो लिटि। उपधावृद्धिः। जह्वार। जह्वरतुः। जह्वरुः॥

जकर्थ। जक्रथुः। जक्र। जकार। जकृव। जकृम॥ कर्ता॥ ऋद्धनोः स्ये॥ ऋतो हन्तेश्च स्य
स्येट्॥ करिष्यति॥ करतु। अकरत्॥ गुणोर्त्तिसंयोगाद्योः॥ अर्त्तेः संयोगादेर्ऋदंतस्य च
गुणो यक्रियादावार्धधातुके किति लिङि॥ कर्यात्। अकार्षीत्। अकरिष्यत्॥ स्वृ श
ब्दोपतापयोः॥ स्वरति॥ स्वरतीति वेट्॥ सस्वरिथ। सस्वर्थ॥ वमयोस्तु स्वरत्यादिविक
ल्पं बाधित्वा पुरस्तात्प्रतिषेधकांडारंभसामर्थ्यात्॥ श्र्युकः क्कितीति निषेधश्चाभूत्क्रादि
नियमान्नित्यमिट्॥ सस्वरिव। सस्वरिम॥ परत्वाद्धनोरितीति नित्यमिट्॥ स्वरिष्यति
स्मृ चिंतायां॥ स्मरति॥ कृ संवरणे॥ करति॥ हृ गतौ भक्रादित्वान्नेट्॥ सस्वर्य। सस्
व॥ सस्मर॥ रिङ् शयग्लिङ्क्षु॥ शयक्ियाद्यावार्धधातुके लिङि च ऋतो रिङ्। रीङ् वि
धिसामर्थ्यान्न दीर्घः॥ स्रीयात्। असार्षीत्॥ शीघ्रगतौ पाघ्रेति सितिधौ रादेशः॥
धावति॥ गृ घृ सेचने॥ ध्वृ हूर्छने॥ दृशिर् प्रेक्षणे॥ पश्यति॥ विभाषा सृजिदृशोः॥

आभ्यां पलट्इट्। सृजिदृशोर्झल्यमकिति॥ अनयोरमागमः स्याद्झलादावकिति॥ द्रष्टा॥ दर्शिषिद्रष्टा। षढोः कः सि॥ द्रक्ष्यति॥ दृश्यात्॥ इतित्वादङ्। ऋदृशोऽङि गुणः। अदर्शत्। अङभावे॥ न दृशः॥ दृशाश्व्योर्वक्ष्यमाणः क्सो न॥ अद्राक्षीत्॥ अद्रक्ष्यत्॥ सुञ्‌अभिषवे॥ स्वादिभ्यः श्नुः॥ श्नुवः आदेशः श्नुप्रत्ययः स्यात् कर्त्रर्थे सार्वधातुके॥ सुनोति॥ सार्वधातुकमपित्॥ अपित्सार्वधातुकं ङिद्वत्स्यात्॥ सुनुतः। हुश्नुवोः सार्वधातुके॥ हुश्नुवोरनेकाचोऽसंयोगपूर्वोवर्णस्य यण्स्यादचि सार्वधातुके॥ सुन्वंति। सुनोषि। सुनुथः। सुनुथ। सुनोमि। लोपश्चास्यान्यतरस्यां म्वोः॥ असंयोगपूर्वस्य प्रत्ययोकारस्य लोपो वा म्वोः परयोः॥ सुन्वः। सुनुवः। सुन्मः। सुनुमः। सुषाव। सुषुवतुः। सुषुवुः। सुषोथ। सुषुविथ। सुषुवथुः। सुषुव। सुषाव। सुषव। सुषुविव। सुषुविम। सोता। सोष्यति। सुनोतु। सुनुतात्। सुनुतां। सुन्वंतु। उतश्च प्रत्ययादसंयोगपूर्वात्॥ असंयोगपूर्वात्प्रत्ययोतो हेर्लुक्॥ सुनु। सुनुतात्। सुनुतं। सुनुत। गुणावादेशौ॥ सुनवानि॥ सुनवाव। सुनवाम। असुनोत्। असुनुतां। असुन्वन्। असुनोः। असुनुतं। असुनुत। असु

स्राव। अस्मृएव। अस्मृणुव। अस्मृणुम। अस्मृएम। स्मृणुयात्। स्मृणुयातां। स्मृणुयुः। स्मृणुयाः। स्मृणुया
तं। स्मृणुयात। स्मृणुयां। स्मृणुयाव। स्मृणुयाम। स्मृर्यात्। अस्मोर्षीत्। अस्मोर्ष्यत्। गम्लृ सृप्लृ गतौ। इष
गमियमां छः॥ शिति॥ गच्छति। जगाम। गमहनजनखनघसां लोपः क्ङित्यनङि। एषामुपधाया लोपो
जादौ क्ङिति न त्वङि। जग्मतुः। जग्मुः। जगमिथ। जगन्थ। जग्मथुः। जग्म। जगाम। जगम। जग्मिव। ज
ग्मिम। गंता। गमेरिट् परस्मैपदेषु। गमेः सादेरार्धधातुकस्येट् परस्मैपदेषु। गमिष्यति। गच्छतु। अग
च्छत्। गच्छेत्। गम्यात्। पुषादिद्युताद्य्लृदितः परस्मैपदेषु॥ श्यन्विकरणपुषादेर्द्युतादेर्ल्दितश्च प
रस्य च्लेरङ् परस्मैपदेषु। अगमत्। अगमिष्यत्। सर्पति॥ अनुदात्तस्य चर्दुपधस्यान्यतरस्यां
उपदेशेऽनुदात्तोय ऋदुपधस्तस्याम्वा झलादावकिति। स्रप्ता। सर्प्ता। असृपत्। ञिक्ष्विदा अव्यक्ते
शब्दे॥ क्ष्वेदति॥ यभ मैथुने॥ यभति। येभिथ॥ झषस्तथोर्धोऽधः॥ झषः परयोस्तथयोर्धः स्यान्न तु दधा
ते। ययब्ध। यब्धा॥ णमु प्रह्वत्वे शब्दे च॥ नेमिथ॥ ननंथ॥ नंता। अनंसीत्॥ अनंसिष्टां॥ त्यज हानौ॥
त्यजति। तत्यजिथ। तत्यक्थ। त्यक्ता। अत्याक्षीत्। अत्याक्तां। अत्याक्षुः। अक्षू व्याप्तौ। अक्षोऽन्यत
रस्यां। श्नुर्वा स्यात् कर्तरि सार्वधातुके॥ पदे राषः। अक्ष्णोति। अक्षति। आनक्ष। आनक्षिम। आ

नष्ट। उदित्वाद्वेट। अक्षिता। अष्टा। अक्षिष्यति। स्कोरितिकलोपः। तक्षौः कार्श्ये। अक्ष्य
ति। अक्ष्णोतु। अक्ष्णुहि। अक्ष्णवानि। आक्ष्णोत्। आक्ष्णवं। अक्ष्णुयात्। अक्ष्णु
यातां। अक्ष्णुयुः। अक्ष्यात्। आक्षीत्। आक्षिष्टां। आष्टां। तक्षू त्वक्षू तनूकरणे। तनूक
रणे तक्षः॥ सुर्वाशप्विषये। तक्ष्णोति तक्षति। वाकाष्टं। ततक्षिथ। ततष्ठ। अतक्षीत्। अतक्षि
ष्टां। अताक्षीत्। अताष्टां। तनूकरणे किं। वाग्भिः संतक्षति। भर्त्सयतीत्यर्थः॥ रक्षपालने। र
क्षति। णिक्ष चुंबने॥ प्रणिक्षति॥ वक्षरोषे॥ संघातइत्येके॥ वक्षति॥ म्रक्षसंघाते॥ म
क्षइत्येके॥ तृक्ष त्वचने॥ त्वचनं संवरणं त्वचोग्रहणं च॥ पक्ष परिग्रह इत्येके॥ स्तृक्ष आ
दरे॥ स्तृक्षति॥ णुस स्तृक्ष॥ कांक्षि वांक्षि मांक्षि कांक्षायां॥ द्राक्षि ध्राक्षि ध्वाक्षि घोरवा
शितेच॥ चूष पाने॥ तुष तुष्टौ॥ पूष वृद्धौ॥ मूष स्तेये॥ लूष रूष भूषायां॥ शूष श
सवे॥ यूष हिंसायां॥ जूष च॥ भूष अलंकारे॥ जि जये। जयति। सन्लिटोर्जेः॥
सन्लिटोर्निमित्ता दभ्यासात्परस्य जेः कुत्वं॥ जिगाय। जिगयिथ। जिगेथ। जीव प्राण
धारणे॥ जीवति। पीव मीव तीव णीव स्थौल्ये। पीवति। पिपीव। मूर्व बंधने। उपधा

यांचा। धातोरुपधाभूतयो रेफवकारयोर्हल्परयोः परतरको दीर्घः। मूर्वति।
मुमूर्व। पुर्व पर्व मर्व पूरणे। पूर्वति। पुपूर्व। चर्व अदने। चर्वति॥ खष शिष
जष झष शष वष मष रुष रिष हिंसार्थाः॥ शेषति। शिशेष। शलइगुपधादनिटः
क्सः॥ इगुपधो यः शलन्तस्मादनिटश्च्लेः क्सादेशः॥ अशिक्षत। तीषसहलुभ
रुषरिषः॥ इच्छत्यादेः परस्य तादेरार्धधातुकस्येड्वा। रोषिता। रोष्टा। रेषि
ता। रेष्टा। भष भर्त्सने। इह भर्त्सनं श्वरवः॥ पुष पुष्टौ। पोषिता। पोष्टा। अनुदा
त्तेषु पुष्येति श्यना निर्देशादयमुदात्तः। अङ्विधौ दैवादिकस्य ग्रहणा
न्नाङ्॥ श्रिषु श्लिषु प्रुषु प्लुषु दाहे। श्रेषति। श्लेषति। प्रोषति। प्लोषति॥ इति
परस्मैपदप्रक्रिया॥ एध वृद्धौ॥ टित आत्मनेपदानां टेरे॥ टितो लस्या
त्मनेपदानां टेरेत्वं। एधते॥ आतो ङितः॥ अतः परस्य ङितामात इय्। एधेते।

एधंते। धासःसे। टितोलस्य। एधसे। एधेथे। एधध्वे। एधे। एधावहे। एधाम
हे। इजादेश्च गुरुमतोनृच्छः। इजादिर्योधातुर्गुरुमान् ऋच्छत्यन्यस्ततआम्
लिटि। आम्प्रत्ययवत्कृञोनुप्रयोगस्य। आम्प्रत्ययोतुल्यमनुप्रयुज्यमानात्
कृञोप्यात्मनेपदंस्यात्। लिटस्तझयोरेशिरेच्। लिडादेशयोस्तझयोरेशिरे
चौस्तः। एशाञ्चारणंज्ञापकङ्गुदेशानांटेरेत्वंनेतितेनडारोरसांन। एधांचक्रे।
एधांचक्राते। एधांचक्रिरे। एधांचकृषे। एधांचक्राथे। इणःषीध्वंलुङ्लिटां
धोंगात्। इणन्तादंगात्परेषांषीध्वंलुङ्लिटांधस्यढः। एधांचकृढ्वे। एधांच
क्रे। एधांचकृवहे। एधांचकृमहे। एधांबभूव। एधामास। अनुप्रयोगसाम
र्थ्यादस्तेर्भूभावोन। अन्यथाहिकृञ्स्वानुप्रयुज्येतइतिकेचित्तिवाब्रूयात्।
एधिता। एधितारौ। एधितारः। धिच। धादौप्रत्ययसलोपः। एधिताध्वे। हए
ति। तासस्त्योःसस्य। एधिताहे। एधितास्वहे। एधितास्महे। एधिष्यते। एधिष्येते

×२एधितासे॥एधिताथे॥×

एधेतां। एधंतां। एधेथाः। एधेथां। एध्वं। एधे। एधावहि। एधामहि॥३॥

एधिष्यंते॥ एधिष्यसे। एधिष्येथे। एधिष्यध्वे। एधिष्ये। एधिष्यावहे। एधिष्यामहे। आमे
तः। लोट एत आम् स्यात्॥ एधतां। एधेतां। एधंतां। सवाभ्यां वामौ। सवाभ्यां परस्य लोडेतः क्र
माद्वामौ स्तः॥ एधस्व। एधेथां। एधध्वं। एत ऐ॥ लोडुत्तमस्य। एधै। एधावहै। एधामहै॥ लिङः सी
युट्। सलोपः। एधेत। एधेयातां। झस्य रन्॥ लिङः। एधेरन्। एधेथाः॥ एधेयाथां॥ एधेध्वं।
इटोऽत्। लिङादेशस्य। एधेय। एधेवहि। एधेमहि॥ सुट् तथोः॥ लिङस्तथोः सुट्। यलोपः। ए
धिषीष्ट। एधिषीयास्तां। एधिषीरन्। एधिषीष्ठाः। एधिषीयास्थां। एधिषीध्वं। एधिषीय। ए
धिषीवहि। एधिषीमहि। ऐधिष्ट। ऐधिषातां। आत्मनेपदेष्वनतः। अनकारात्परस्यात्मने
षुझस्यात स्यात्। ऐधिषत। ऐधिष्ठाः। ऐधिषाथां। ऐधिढ्वं। ऐधिषि। ऐधिष्वहि। ऐधिष्महि। ऐ
धिष्यत। ऐधिष्येतां। ऐधिष्यंत। ऐधिष्यथाः। ऐधिष्येथां। ऐधिष्यध्वं। ऐधिष्ये। ऐधिष्याव
हि। ऐधिष्यामहि। कमु कांतौ। कमेर्णिङ्। स्वार्थे। कामयते। अयामंताल्वाय्येत्न्विष्णुषु॥ एणु
णेरय्। कामयांचक्रे। आयादय इति वा। चकमे। चकमाते। चकमिरे। चकमिषे। चकमाथे।
चकमिध्वे। चकमे। चकमिवहे। चकमिमहे। कामयितासे। कमितासे। कामयिष्यते। कमिष्यते

×कामयिता॥ × ×कमिता॥१

कामयतां। अकामयत। कामयेत। कामयिषीष्ट। कमिषीष्ट। णि श्रिद्रुस्रुभ्यः कर्त्तरि चङ्॥
एयंतात् श्रादिभ्यश्च लेश्चङ् कर्त्तरि लुङि॥ कमि अतइति स्थिते। णेरनिटि। अनिडा
दावार्धधातुके परे णेर्लोपः॥ णौच ङ्युपधाया ह्रस्वः॥ चङ्परे णौ यदंगं तस्योपधाया
ह्रस्वः॥ चङि। तिद्वित्वं॥ सन्वल्लघुनि चङ्परे ऽनग्लोपे। चङ्परे णौ यदंगं तस्ययोभ्या
सो लघुपरस्तस्य सनीव कार्यं स्यान्नत्वग्लोपे सति॥ सन्यतः॥ अभ्यासस्यात इत्सनि। दीर्घो
लघोः॥ लघोरभ्यासस्य दीर्घः सन्वद्भावविषये। अचीकमत॥ णिङभावपक्षे कमेश्च्लेश्च
ङ् वाच्यः॥ अचकमत। अकामयिष्यत। अकमिष्यत। भाम क्रोधे। भामते। बभामे। क्षमूष
सहने॥ क्षमते। चक्षमे। चक्षमिषे। चक्षंसे। चक्षमिवहे। चक्षंवहे॥ मांतस्य धातोर्मस्य
नः स्यात् म्वोः परतः। चक्षण्वहे। चक्षमिमहे। चक्षण्महे। गाधृ प्रतिष्ठा लिप्सयोर्ग्रंथे
च॥ गाधते। बाधृ लोडने। लोडनं प्रतिघातः॥ बाधते। नाथृ नाधृ याच्ञोपतापैश्वर्या
शीःषु॥ आशिष्येव नाथइति वाच्यं॥ अस्याशिष्येवात्मनेपदं स्यात्॥ नाथते। अन्यत्र नाथति

दधधारणे ॥ स्कुदि आप्रवने मुत्स्रवनमुद्धरणं च । स्कुंदते । चुस्कुंदे ॥ श्विदि श्वैत्ये । श्विंदते ॥
शिश्विंदे । वदि अभिवादनस्तुत्योः ॥ भदि कल्याणे सुखे च ॥ भंदते ॥ मदि स्तुतिमोदमद
स्वप्नकांतिगतिषु ॥ मंदते । स्पदि किंचिच्चलने ॥ स्पंदते । मुद हर्षे ॥ मोदते । मुमुदे ॥ ऊर्दमाने ॥
क्रीडायां च ॥ ऊर्दते । ऊर्दांचक्रे ॥ कूर्द खुर्द गुर्द गुद क्रीडायामेव ॥ कूर्दते । खूर्दते । गूर्दते ॥
गोदते । जुगुदे ॥ षूद क्षरणे ॥ सूदते । सुषूदे । ह्राद अव्यक्ते शब्दे ॥ ह्रादते । जह्रादे ॥
ह्रादी सुखे च चादव्यक्ते शब्दे ॥ ह्रादते ॥ स्वाद आस्वादने । स्वादते ॥ पर्द कुत्सिते शब्दे
गुदरवइत्यर्थः ॥ पर्दते । यती प्रयत्ने ॥ यतते । येते ॥ श्रुथि शैथिल्ये ॥ श्रंथते ॥ ग्र
थि कौटिल्ये ॥ ग्रंथते ॥ कत्थ श्लाघायां ॥ कत्थते ॥ चकत्थे ॥ श्लोभ संघाते ॥ संघा
तो ग्रंथः ॥ स चेह यथ्यमानस्य व्यापारो ग्रंथितुर्वा ॥ आद्ये ऽकर्मको द्वितीये सकर्म
कः ॥ श्लोभते ॥ शकि शंकायां ॥ शंकते । शशंके ॥ अकि लक्षणे । अंकते ॥ आनंके ॥

कञिवञिध्वञिचञिठौञ्कत्रौञ्कषञ्कवस्कमस्कटि[illegible]ञ्कटीञ्कतिञ्कतीञ्करघिल
घिगत्यर्थाः॥अंकते॥वंकते।श्वंकते।त्रंकते।ठौकते।डुठौके।त्रौकते।तुत्रौके।सुष्वा
तुष्ठिवुष्वस्कतीनांसत्वनिषेधोवक्तव्यः॥वस्कते।ववस्के।वस्कते।मस्कते।टिकते।
टीकते।तेकते।तीकते।रंघते।लंघते।श्लाघृकत्थने।श्लाघते।शश्लाघे।पचि
व्यक्तीकरणे॥पंचते।ऋजगतिस्थानार्जनोपार्जनेषु॥ऋजते।तुदिधोअकारे
कदेशोरेफोहलत्वेनगृह्यते॥तेनद्विहलत्वानुट्।आनृजे।एजृभ्रेजृभ्राजृदीप्तौ॥
एजते।भ्रेजते।बिभ्रेजे।भ्राजते।बभ्राजे।वेष्टवेष्टने।वेष्टते।विवेष्टे।चेष्टचेष्टायां।
चेष्टते।चिचेष्टे।स्फुटविकसने।स्फोटते।पुस्फुटे।टुवेपृकंपने।वेपते।कपिच
लने।कंपते।भिक्षभिक्षायामलाभेलाभेच।भिक्षते।दीक्षमौंड्येज्योपनयननियम
व्रतादेशेषु।दीक्षते।दिदीक्षे।भाषव्यक्तायांवाचि।भाषते।वर्षस्नेहने।वर्षते।ईह
चेष्टायां।

ईहते। ईहांचक्रे॥ विभाषेटः॥ इणःपरोयङ्टातःपरेषांषीध्वंलुङ्लिटांधस्यवा
ढः। ईहिषीढ्वं। ईहिषीध्वं। गर्ह गल्ह कुत्सायां। गर्हते। गल्हते। काशृ दीप्तौ॥ काशते। ऊहवि
तर्के॥ ऊहते॥ कथमवक्रमप्यूहति पंडितोजनइति॥ अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यं।
अनुदात्तेतश्चक्षिङोङित्करणात्ज्ञापकात्। तेनउदयूति यदिभानुःस्यायंनिमेकि संधि
तित्यादिसिद्धमित्याहुः॥ अयगतौ॥ अयते॥ उपसर्गस्यायतौ॥ अयतावुपसर्गस्यरेफ
स्यलत्वं॥ प्लायते। पलायते॥ दयायासश्च॥ एभ्यआम्लिटि॥ अयांचक्रे॥ अयिता। अ
यिष्यते॥ अयतां। आयत। अयेत। अयिषीष्ट॥ विभाषेटः॥ अयिषीढ्वं॥ अयिषीध्वं।
आयिष्ट। आयिढ्वं। आयिध्वं। आयिष्यत। द्युत दीप्तौ॥ द्योतते॥ द्युतिस्वाप्योः संप्रसार
णं॥ अभ्यासस्य॥ दिद्युते। द्योतिता। द्योततां। अद्योतत। द्योतेत। द्योतिषीष्ट। द्युद्भ्यो
लुङि॥ द्युतादिभ्यःपरस्मैपदंवालुङि॥ सुषादीत्पङ्। अद्युतत्। अद्योतिष्ट। अद्योतिष्यत।
एवंश्वितावर्णे॥ ञिमिदास्नेहने॥ ञिष्विदास्नेहनमोचनयोः॥ मोहनयोरित्येके॥ स्वेदते

ञिक्ष्विदा चेत्येके। ञिष्विदा स्नेहनमोचनयोः। ...

ञिविदाचेत्येके। रुचदीप्तावभिप्रीतौच। घुट्परिवर्त्तने। शुभदीप्तौ। क्षुभसंचलने।।
णभतुभहिंसायां। स्रंसु ध्वंसु भ्रंसु अवस्रंसने। ध्वंसुगतौच। स्रंभुविश्वासे। वृतु
वर्त्तने। वर्त्तते। नाद्युपदेभ्यो लिटः कित्वंगुणात्पूर्वविप्रतिषेधेन।। ववृते। वर्त्तिता। वृद्भ्यः
स्यसनोः।। वृतादिभ्यः पंचभ्यो वा परस्मैपदं स्ये सनि च कर्त्तव्ये। न वृद्भ्यश्चतुर्भ्यः।। वृतु
वृधु शृधु स्यंदूभ्यः सादेरार्धधातुकस्येण्न तङानयोरभावे।। वर्त्स्यति। वर्त्तिष्यते।
वर्त्ततां। अवर्त्तत। वर्त्तेत। वर्त्तिषीष्ट। अवृतत्। अवर्त्तिष्ट। अवर्त्स्यत्। अवर्त्तिष्यत।
एवं वृधु वृद्धौ। शृधु शब्दकुत्सायां।। स्यंदू प्रस्रवणे।। स्यंदते। सस्यंदे। सस्यंदिषे।। सस्यं
त्से। सस्यंदिध्वे। सस्यंद्ध्वे। स्यंदिता।। स्यंत्ता। वृद्भ्यः स्यसनोरिति परस्मैपदे कृते उदि
त्त्वाणमंतरंगमपि विकल्पं बाधित्वा चतुर्ग्रहणसामर्थ्यान्न वृद्भ्य इति निषेधः।। स्यं
त्स्यति। स्यंदिष्यते। स्यंत्स्यते। स्यंदिषीष्ट। स्यंत्सीष्ट। द्युद्भ्यो लुङीति परस्मैपदपक्षे अङ्
नलोपः। अस्यदत्। अस्यंदिष्ट। अस्यंत्त। अस्यंत्साताम्। अस्यंत्स्यत्। अस्यंदिष्यते।

अस्यंस्यत॥ अनुविपर्यभिनिभ्यः स्यंदतेरप्राणिषु॥ एभ्यः परस्याप्राणिकर्तृकस्य स्यंदतेः स
स्य षो वा॥ अनुष्यंदते॥ अनुस्यंदते वा जलं॥ अनुस्यंदते हस्ती॥ कृपू सामर्थ्ये॥ कृपो रो लः।
कृप उरः ल इति छेदः॥ कृपेः ऋकारस्यावयवो यो रेफः सदृशस्तस्य च लकारः सदृशः स्यात्।
कल्पते। चक्लृपे। चक्लृपिषे। चक्लृप्से॥ इत्यादि स्यंद्वत्॥ लुटि च क्लृपः॥ लुटि स्यसनो
श्च क्लृपेः परस्मैपदं वा॥ तासि च क्लृपः॥ क्लृपेः परस्य तासेः सादेरार्धधातुकस्येण्न
अनयोरभावे॥ कल्प्तासि॥ कल्पितासे॥ कल्प्तासे। कल्प्स्यति। कल्पिष्यते। कल्प्स्यते॥ क
ल्पिषीष्ट॥ लिङ्सिचावात्मनेपदेषु॥ इक्समीपाद्धलः परौ झलादी लिङ् आत्मनेपदपरसि
चौ कितौ स्तः॥ क्लृप्सीष्ट॥ अक्लृपत॥ अकल्पिष्ट॥ अक्लृप्त॥ अकल्प्स्यत्। अकल्पि
ष्यत॥ अकल्प्स्यत॥ दद दाने॥ ददते॥ दददे। दददाते। दददिरे। ददिता॥ ददिष्यते। दद
तां॥ अददत॥ ददेत। ददिषीष्ट। अददिष्ट॥ अददिष्यत॥ त्रपूष् लज्जायां॥ त्रपते॥ तॄफ
लभजत्रपश्च॥ एषामत एत्वमभ्यासलोपश्च किति लिटि सेटि थलि च। त्रेपे। त्रपिता। त्रप्ता।

त्रपिष्यते। त्रप्स्यते॥ त्रपतां। अत्रपत॥ घट चेष्टायां। घटते। जघटे। व्यथ भयसंचलनयोः॥
व्यथते। व्यथो लिटि। अभ्यासस्य संप्रसारणं स्यात्। हलादिः शेषापवादः॥ विव्यथे॥ प्रथ प्रख्या
ने। प्रथते। पप्रथे। प्रस विस्तारे। प्रसते। पप्रसे। म्रद मर्दने। म्रदते। स्खद स्खदने। स्खदनं विद्रावनं।
स्खदते। क्रप कृपायां गतौ। क्रपते। ञित्वरा संभ्रमे। त्वरते। टुभ्राजृ टुभ्राशृ टुभ्लाशृ दीप्तौ॥ भ्रा
जते। फणां च सप्तानां॥ फण राज भ्राज भ्राश भ्लाश स्यमु स्वन एषां वा एत्वाभ्यासलोपौ स्तः किति लि
टि सेटि थलि च। भ्रेजे। बभ्राजे। वा भ्राश इति श्यन् वा। भ्राश्यते। भ्राशते। भ्रेशे। बभ्राशे। भ्लाश्यते। भ्ला
शते। भ्लेशे। बभ्लाशे। जभी जृभी गात्रविनामे। रधिजभोरचि नुम्। जंभते। जृंभते। रमु क्रीडायां
रमते। रेमे। रंता। रंस्यते। रंसीष्ट। अरंस्त। अरंस्यत॥ ॥इत्यात्मनेपदप्रक्रिया॥ श्रिञ् सेवा
यां। श्रयति। श्रयते। शिश्राय। शिश्रिये। श्रयितासि। श्रयितासे। श्रयिष्यति। श्रयिष्यते। श्र
यतु। श्रयतां। अश्रयत्। अश्रयत। श्रयेत्। श्रयेत। श्रीयात्। श्रयिषीष्ट। णिश्रीति च
ङ्। अशिश्रियत्। अशिश्रियत। अश्रयिष्यत्। अश्रयिष्यत। भृञ् भरणे। भरति। भरते।

५३ बभार। बभ्रतुः। बभ्रुः। बभर्थ। बभृव। बभृम। बभ्रे। बभृषे। भर्तासि। भर्तासे। भ्रियात्। उश्च। ऋवर्णान्तपरो झलादी लिङ् आत्मनेपदपरस्मिंश्च तेपेतौ कितौ स्तः। भृषीष्ट। भृषीयास्तां। अभार्षीत्। ह्रस्वादङ्गात् सिचो लोपो झलि। अभृत। अभरिष्यत्। अभरिष्यत। हृञ् हरणे। हरति। हरते। जहार। जहर्थ। जहृव। जहृम। जह्रे। जहृषे। हर्ता। हरिष्यते। धृञ् धारणे। धरति। धरते। णीञ् प्रापणे। नयति। नयते। निनाय। निनयिथ। निनेथ। निन्ये। डुपचष् पाके। पचति। पचते। पपाच। पेचिथ। पपक्थ। पेचे। पक्ता। भज सेवायां। भजति। भजते। भेजे। भक्ता। भक्ष्यति। भक्ष्यते। अभाक्षीत्। अभक्त। अभक्षातां। यज [illegible] देवपूजासंगतिकरणदानेषु। यजति। यजते। लिट्यभ्यासस्योभयेषां। वच्यादीनां ग्रह्यादीनां चाभ्यासस्य संप्रसारणं लिटि। इयाज। वचिस्वपियजादीनां किति। वचिस्वप्योर्यजादीनां च संप्रसारणं किति। यजिवपिवहिश्वेववसिवेञ्व्येञ्ह्वयति। वदिश्वयति श्वेवृयजाद्याः स्युरेते किति। यजिवपिवहि... इति नव॥११॥ ईजतुः। ईजुः। इयजिथ। इयष्ठ। ईजे। यष्टा। यक्ष्यति। यक्ष्यते। इज्यात्। याय

त्सीष्ट। आयासीत्। अयष्ट। वह प्रापणे। वहति। वहते। उवाह। ऊहतुः। ऊहुः। उवहिथ। झषस्तथो र्धोधः॥ झषः परयोस्तथयोर्धः स्यान्नतु दधातेः। ढो ढे लोपः॥ सहिवहोरोदवर्णस्य। ढलोपे। उवोढ। वोढा॥ वक्ष्यति। अवाक्षीत्। अवोढां। अवाक्षुः। अवाक्षीः। अवोढं। अवोढ। अवाक्षं। अवाक्ष्व। अवाक्ष्म। अवोढ। अवक्षातां। अवक्षत। अवोढाः। अवक्षाथां। अवोढ्वं। अवाक्षि। अवक्ष्वहि। अवक्ष्महि। डुवप् बीजसंताने। बीजसंतानं क्षेत्रे विकिरणं गर्भाधानं च। अयं छेदनेपि। केशान् वपति। वपते। उवाप। ऊपे। वप्ता। उप्यात्। वप्सीष्ट। प्रणमवाप्सीत्। अवप्त। वेञ् तंतुसंताने। वयति। वयते। वेञो वयिः॥ वा स्यात् लिटि। इकार उच्चारणार्थः। उवाय। ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च॥ चात् किति संप्रसारणं। इति यस्य संप्रसारणे प्राप्ते। लिटि वयो यः॥ वयो यस्य संप्रसारणं न लिटि। ऊयतुः। ऊयुः। वश्चा स्यान्यतरस्यां किति॥ वयो यस्य वो वा स्यात् किति लिटि॥ वयस्त्वाभावभावात्पक्षे लित्यत्वलिटि। उवयिथ। स्यानिवत्वेन ञित्वात्तङ्। ऊये। ऊवे। वयादेशाभावे॥ वेञः॥ संप्रसारणं न लिटि।

ववौ। ववतुः। ववुः। वविथ। ववाथ। ववे। वाता। वास्यति। वास्यते। ऊयात्। वासीष्ट। अवा
सीत्। अवासिषां। अवास्त। व्येञ् संवरणे। व्ययति। व्ययते। न व्यो लिटि। आत्वं न॥
परमपि हलादिशेषं बाधित्वा यस्य संप्रसारणं। उभयेषां ग्रहणसामर्थ्यात्। अ
न्यथा वच्यादीनां ग्रह्यादीनां चानुवृत्त्यैव सिद्धेः किं तेन। विव्याय। विव्यतुः। विव्युः
। इडत्यर्तिव्ययतीनां। अद्भुसव्येञ् एभ्यस्य लो नित्यमिट्। विव्ययिथ विव्याय वि
व्यय। व्याता। व्यासीष्ट। अव्यासीत्। अव्यास्त। ह्वेञ् स्पर्धायां शब्दे च। ह्वयति। ह्व
यते। अभ्यस्तस्य च। अभ्यस्तीभविष्यतो ह्वेञः संप्रसारणं। जुहाव। जुहुवे। ह्वा
ता। ह्वातासे। लिपिसिचिह्वश्च। आत्मनेपदेष्वन्यतरस्यां। अह्वत। अह्व
त। अह्वास्त। राजृ दीप्तौ। राजति। राजते। रराज। रेजतुः। रराजतुः। रेजे। रराजे। हिक्क
अव्यक्ते शब्दे। हिक्कति। हिक्कते। अंचु गतौ याचने च। अंचति। अंचते। अंच इत्येके

x च्लेरङ् वा॥३४ x

अचिंइत्यपरे। टुयाङ्यांचायां। याचति। याचते। बुधिर् बोधने। बोधति। बोधते। अबुधत्। अबोधीत्। अबोधिष्ट। अबोधिष्यत्। अबोधिष्यत। खन अवदारणे। खनति। खनते। चखान। चखनतुः। चख्ने। खायात्। खन्यात्। चीव आदान संवरणयोः। चीवति। चीवते। चायृ पूजानिशामनयोः। चायति। चायते। व्यय गतौ। व्ययति। व्ययते। दाशृ दाने। दाशति। दाशते। भेषृ भये। गतावित्येके। [illegible]। भेषति। भेषते। असगतिदीप्त्यादानेषु। असति। असते। आस। आसे। अयं षांतोपि। स्पश बाधनस्पर्शनयोः। स्पर्शनं दानं। स्पशति। स्पशते। लष कांतौ। वाभ्राशेति श्यन्वा। लष्यति। लष्यते। लषते। चष भक्षणे। चषति। चषते। छष आदान संवरणयोः। छषति। छषते। दासृ दाने। दासति। दासते। धावु गतिशुद्ध्योः। धावति। धावते। इतिभ्वादि। अतः तीयङ्। स्वार्थे। ऋतिः सौत्रः। घृणु सायामिति बहवः। कृपायांचेत्येके। ऋतीयते। ऋतीयांचक्रे। आर्धधातुके आयादय इ

तिङ्यङ्। भावपक्षे शेषात् इति परस्मैपदं। आनर्त्त। अर्त्तितेत्यादि। अद भक्षणे। अ
दिप्रभृतिभ्यः शपः। लुक् स्यात्। अत्ति। अत्तः। अदंति। अत्सि। अत्थः। अत्थ। अ
द्मि। अद्वः। अद्मः॥ लिट्यन्यतरस्यां॥ अदो घस्ल् वा स्यात्॥ जघास। उपधालोपः घस्य चर्त्वं।
शासिवसिघसीनां च॥ इण्कुभ्यां मेषां सः ष्षः। जक्षतुः। जक्षुः। जघसिथ। आद। आदतुः। आ
दुः। आदिथ। अत्ता। अत्स्यति। अत्तु। अत्तात्। अत्तां। अदंतु। हुझल्भ्यो हेर्धिः॥ अद्धि। अ
त्तात्। अत्तं। अत्त। अदानि। अदाव। अदाम। अदः सर्वेषां॥ अदोऽपृक्तसार्वधातुक
स्याट् स्यात्। आदत्। आत्तां। आदन्। आदः। आत्तं। आत्त। आदं। आद्व। आद्म। अ
द्यात्। अद्यातां। अद्युः। अद्यात्। अद्यास्तां। अद्यासुः। लुङ्सनोर्घस्ल्। अदः। लृदि
त्वादङ्। अघसत्। आत्स्यत्। हन हिंसागत्योः। हंति। अनुदात्तोपदेशवनतितनोत्या
दीनामनुनासिकलोपो झलि क्ङिति। अनुनासिकांतानामेषां लोपः॥ यमिरमिनमिगमिहनिम
न्यतयोऽनुदात्तोपदेशाः। तनु क्षणु क्षिणु ऋणु तृणु घृणु वनु मनु तनोत्यादयः। हतः॥

घ्नंति। हंसि। हथः। हथ। हन्मि। हन्वः। हन्मः। वमोर्वा। उपसर्गस्थान्निमित्ताद्धंतेर्नस्य णः स्यात्॥
प्रहण्मि। प्रहन्मि। प्रहण्वः। प्रहन्वः। जघान। जघ्नतुः। जघ्नुः। अभ्यासाच्च॥ हंतेर्हस्य कुत्वं। जघ-
निथ। जघंथ। जघ्नथुः। जघ्न। जघान। जघन। जघ्निव। जघ्निम। हंता। हनिष्यति। हंतु। हतात्
। हतां। घ्नंतु। हंतेर्जः॥ हौ॥ असिद्धवदत्राभात्॥ इत ऊर्ध्वमापादपरिसमाप्तेराभीयं समा-
नाश्रये तस्मिन् कर्त्तव्ये तदसिद्धं। इति जस्यासिद्धत्वान्न हेर्लुक्। जहि। हतात्। हतं। हत। हनानि।
हनाव। हनाम। अहन्। अहतां। अघ्नन्। अहन्। अहतं। अहत। अहनं। अहन्व। अहन्म।
हन्यात्। आर्द्धधातुके इत्यधिकृत्य॥ हनो वध लिङि॥ लुङि च। वध्यात्। वध्यास्तां। अवधी-
त्। अहनिष्यत्। युमिश्रणामिश्रणयोः॥ उतो वृद्धिर्लुकि हलि॥ लु[illegible]ग्विषये उतो वृद्धिः पिति ह-
लादौ सार्वधातुके। न त्वभ्यस्तस्य। यौति। युतः। युवंति। यौषि। युथः। युथ। यौमि। युवः। युमः।
युयाव। यविता। यविष्यति। यौतु। युतात्। अयौत्। अयुतां। अयुवन्। युयात्। इह उतो वृद्धिर्न। भाष्ये पि

इडिन्त डित्स्यपि नेति व्याख्यानात्॥ यायात्॥ यायास्तां॥ यायासुः॥ अयावीत्। [illegible] यीत्। अयविष्यत्। या प्रापणे॥ याति। यातः। यांति। यासि। याथः। याथ। यामि। यावः। यामः॥ ययौ। याता। यास्यति। यातु। अयात्। अयातां। लङः शाकटायनस्यैव॥ आदंतात् लङो झेर्जुस्वा अयुः। अयान्। यायात्। यायातां। यायात्। यायास्तां। अयासीत्। अयासिष्टां। अयास्य त्। एवं वा गतिगंधनयोः। भा दीप्तौ। [illegible] श्रा शौचे। श्रा पाके। द्रा कुत्सायां गतौ। प्सा भक्षणे। पा रक्ष णे। रा दाने। दाप् लवने। ख्या प्रकथने॥ अयं सार्वधातुक एव प्रयोक्तव्यः। विद ज्ञाने। विदो ल टो वा। वेत्तेर्लटः परस्मैपदानां णलादयो वा॥ वेद। विदतुः। विदुः। वेत्थ। विदथुः। विद। वेद। वि द्व। विद्म। पक्षे। वेत्ति। वित्तः। विदंति। उषविदजागृभ्योऽन्यतरस्यां। एभ्यो लिट्याम्वा। विदेरदंतत्व प्रतिज्ञानादाम्नि न गुणः॥ विदांचकार। विवेद। वेदिता। वेदिष्यति। विदांकुर्वंत्वित्यन्यतर स्यां॥ वेत्तेर्लोट्याम् गुणाभावो लोटो लुक्॥ लोडंतकरोत्यनुप्रयोगश्च वा निपात्यंते॥ पुरुषवच नेन विवक्ष्यते॥ तनादिकृञ्भ्य उः॥ विदांकरोतु। अत उत्सार्वधातुके॥ उप्रत्ययांतस्याकिञोऽ

तउसार्वधातुके क्ङिति ॥ विदांकुरुतात् । विदांकुरुतां । विदांकुर्वंतु । विदांकुरु । विदांकरवाणि ॥
अवेत् । अवित्तां । अविदुः । दश्च । धातोर्दस्य पदांतस्य सिपि रुर्वा ॥ अवेः । अवेद । विद्यात्
विद्यातां । विद्यात् । विद्यास्तां । अवेदीत् । अवेदिष्यत् । असभुवि । अस्ति । असोरल्लोपः
असस्तेश्चातो लोपः सार्वधातुके क्ङिति । स्तः । संति । असि । स्थः । स्थ । अस्मि । स्वः स्मः
[illegible] ॥ अस्तेर्भूः । आर्द्धधातुके । बभूव । भविता । भविष्यति । अस्तु । स्तात् । स्तां । संतु
ध्वसोरेद्धावभ्यासलोपश्च ॥ घ्वोरस्तेश्च एत्वं स्यात् हौ अभ्यासलोपश्च ॥ आभीयत्वादेर्द्धिः ॥
एधि । स्तात् । स्तं । स्त । असानि । असाव । असाम । आसीत् ॥ आस्तां । आसन् । स्यात्
स्यातां । स्युः । भूयात् । अभूत् । अभविष्यत् । उपसर्गप्रादुर्भ्यामस्तिर्यच्परः । उपसर्गेण
प्रादुषश्च परस्यास्तेः सस्य षो वा ॥ यकारे अचि परे । निष्यात् । प्रादुःष्यात् निषंति । प्रा
दुःषंति । यच्परे किं । अभिस्तः । रुशब्दे । तुरुस्तुशम्यमः सार्वधातुके । एभ्यः सार्वधातु

४७

वस्य हलादेस्तिङ ईट्वा। नाभ्यस्तस्येत्य ▮ तो उट् इति संभवे पुनः सार्वधातुकग्रहणमपि
दर्थं। रवीति। रौति। रुवीतः। रुतः। हलादेः किं। रुवंति। तिङः किं। शाम्यति। सार्वधातुके किं।
आशिषि रुयात्। विध्यादौ तु रुवीयात्। रुयात्। अरावीत्। अरविष्यत्। तु सौत्रो इति
धातुः। गतिवृद्धिहिंसासु। तवीति। तौति। तुवीतः। तुतः। तुवंति। तुताव। तोता। तोष्य
ति। णु स्तुतौ। नौति। नुनाव। नविता। टुक्षु शब्दे। क्षौति। चुक्षाव। क्षविता। क्ष्णु तेजने।
क्ष्णौति। क्ष्णविता। ष्णु प्रस्रवणे। स्नौति। सुस्नाव। स्नविता। षु प्रसवैश्वर्ययोः। प्रस
वोऽभ्यनुज्ञानं। सौति। सुतः। सुषाव। सोता। असौषीत्। कु शब्दे। कौति। चुकाव। कोता
इण् गतौ। एति। इतः। इणो यण्। अजादौ प्रत्यये। यंति। अभ्यासस्यासवर्णे। अ
भ्यासस्य इउवर्णयोरियङुवङौ स्तोऽसवर्णे स्वरे। इयाय। दीर्घ इणः किति। इ
णोऽभ्यासस्य दीर्घः किति लिटि। ईयतुः। ईयुः। इययिथ। इयेथ। ऐत्। ऐतां। आ
यन्। इयात्। ईयात्। एतेर्लिङि॥ उपसर्गस्य इणो ह्रस्वः स्यादार्ध

धातुके क्विति लिङि॥ नियात्॥ अंतादिवत्॥ योयमेकादेशः स पूर्वस्यांतवत् परस्यादिवत्
स्यात्॥ इतिप्राप्ते। उभयत आश्रये नांतादिवत्॥ अभीयात्॥ अणः किं॥ समेयात्॥ इणोगालु
ङि॥ गातिस्थेति सिचोलुक्॥ अगात्। अगातां॥ अगुः। ऐष्यत्। इक्स्मरणे। अयमधिपूर्व एव
अधीगर्थदयेषां कर्मणीति लिंगात्॥ इणवदिकीति वक्तव्यः॥ अधियंति। अध्यगात्। केचि
त्त्वार्धधातुकाधिकारोक्तस्यैवातिदेशमाहुः॥ तन्मते यणन्। तथा च भट्टिः॥ ससीतयो राघवयो
रधीयन् इति। वीगतिव्याप्तिप्रजनकांत्यसनखादनेषु। प्रजनो गर्भग्रहणं॥ असनं क्षेपणं॥
वेति। वीतः। वियंति। वेषि। वेमि। वीहि। अवेत्। अवीतां। अवियन्। अट्सत्यनेकाचत्वाद्घु
णीति केचित्। अव्यन्। अत्रइकारोपि धात्वंतरं प्रश्लिष्यते॥ एति। ईतः। इयंति। ईयात्। ऐषीत्
। वचपरिभाषणे। वक्ति। वक्तः। अयमंतिपरो न प्रयुज्यते। बहुवचनपर इत्यन्ये। झिपर इत्यप
रे। वक्तु। वग्धि। वच्यात्। अस्यतिवक्ति[illegible]तिभ्योङ्॥ ब्रुवः॥ वचपरिभाषणे। वच उम्। आङि।
अवोचत्। अवक्ष्यत्। मृजूष् शुद्धौ॥ मृजेर्वृद्धिः॥ इको धातुप्रत्यये। मार्ष्टि। मृष्टः। क्ङित्यजादौ
वेष्यते। मार्जंति। मृजंति। ममार्ज। ममृजतुः। ममार्जतुः। ममार्जिथ। ममार्ष्ठ। मार्जिता। मार्ष्टा। मार्ष्टु

मृढ्ढि। अमार्ट्। अमार्जी। अमार्जीत्। अमार्क्षीत्। अमार्जिष्यत्। अमार्क्ष्यत्। रुदिर् अश्रुवि
मोचने। रुदादिभ्यः सार्वधातुके। रुद् स्वप् श्वस् अन् जक्ष एभ्यो वलादेः सार्वधातुकस्येट् स्यात्। रो
दिति। रुदितः। होपरत्वादि ङिद्वत्वं न। रुदिहि। रुदस्वपंचभ्यः। एभ्यो हलादेः पितः सार्वधा
तुकस्यापृक्तस्य ईट् स्यात्।। अङ्गार्ग्यगालवयोः। अरोदीत्। अरोदत्। अरुदितां। अरु
दन्। अरोदीः। अरोदः। प्रकृतिप्रत्ययविशेषापेक्षा भ्यामडी ड्यां मंतरंगलाघात् सुट्।। असि
द्धं बहिरंगमंतरंगे। अंतरंगेभार्ये कर्त्तव्ये बहिरंगमसिद्धं रुधात्। अरुदत्। अरोदीत्। अ
रोदिष्यत्। ञिष्वप् शये। स्वपिति। स्वपितः। सुष्वाप। सुषुपतुः। सुष्वपिथ। सुष्वप्थ। सुवि
निर्दुभ्यः सुपिसूतिसमाः।। एभ्यः सुष्यादेः सस्य षः। किति लिटि परत्वात्संप्रसारणे षत्वे च
कृते द्वित्वं पूर्वत्रासिद्धीयमद्विर्वचने। सुषुषुपतुः। सुषुषुपुः। अकिति तु द्वित्वे अभ्यासस्य
संप्रसारणं षत्वस्यासिद्धत्वात्ततः पूर्वं हलादिः शेषः।। निसत्वाच्च। ततः सुपित्वपाभावान्नषः। सुसु
षाप। स्वप्ता। अस्वपीत्। अस्वपत्। स्वप्यात् सुप्यात्। सुषुप्यात्। अस्वाप्सीत्। श्वस प्राणने।। श्व

प्राणने॥४

श्वसिति। श्वसितः। श्वसिता। अश्वसीत्। अन च। अनिति। आन। अनिता। आनीत्। अनितेः॥
उपसर्गस्थान्निमित्तात्परस्यानितेर्नस्य णः॥ प्राणिति। जक्ष भक्षहसनयोः॥ जक्षिति। जक्षि-
तः। अदभ्यस्तात्॥ [illegible]स्य। अंतापवादः। जक्षति। अजक्षीत्। अजक्षत्। अजक्षितां॥ सि-
जभ्यस्तेति जुस्। अजक्षुः। जागृ निद्राक्षये। जागर्ति। जागृतः। जाग्रति। जागरांचकार। जजा-
गार। जाग्रोऽविचिण्णल्ङित्सु॥ जागर्तेर्गुणः स्याद्विचिण्णल्ङिद्भ्योऽन्यस्मिन्वृद्धिविषये प्रति-
षेधविषये च। जजागरतुः। जागरिता। अजागः। अजागृतां। जुसि च॥ अजादौ जुसि इ-
गंतांगस्य गुणः॥ अजागरुः। अजादौ किं। जागृयुः। आशिषि तु जागर्यात्। जागर्यास्तां। जा-
जागर्यासुः। गुणो वृद्धिर्गुणो वृद्धिः प्रतिषेधो विकल्पनं। पुनर्वृद्धिर्निषेधोऽतो यण्पूर्वाः प्राप्तयो-
नव॥१॥ इको यणचि। सार्वधातुके सिचि वृद्धिः॥ जाग्रोऽविणल्ङितीति गुणे सति। वदव्रज नेटि। अतो
हलादेः। अतो [illegible] तस्य। ह्म्यंतक्षणः। अजागरीत्। दरिद्रा दुर्गतौ॥ दरिद्राति। इद्दरिद्रस्य॥ हलादौ क्ङि-
ति सार्वधातुके। दरिद्रितः। श्नाभ्यस्तयोरातः॥ लोपः क्ङिति सार्वधातुके। दरिद्रति। अनेकाच्त्वादाम्

स्वां२

दरिद्रांचकार ॥ आतः औ णलः इत्यत्र औ इत्येव सिद्धे औ विधानं दरिद्रातेरालोपे कृते अवणार्थं ॥
अत एव शापप्रयादाम्नेत्येके ॥ ~~दद्रिद्र~~ ॥ ददरिद्रौ ॥ दरिद्रातेरार्धधातुके विवक्षिते आलोपो वाच्यः ॥ लु
ङि वा ॥ सनि ण्वुलि ल्युटि च न ॥ ~~[illegible]~~ दरिद्रिता ॥ अदरिद्रात् ॥ अदरिद्रितां ॥ अदरिद्रुः ॥ दरिद्रियात् ॥
दरिद्र्यात् । अदरिद्रीत् । इट्सकौ । अदरिद्रासीत् । चकास्टदीप्तौ ॥ चकास्ति । चकास्तः । चकासति । चका
सांचकार ॥ चकासिता ॥ तिप्यनस्तेः ॥ पदान्तस्य सस्य दः ॥ अचकात् । अचकासुः ॥ सिपि धातो
रुर्वा ॥ पदान्तस्य सस्य ॥ पक्षे दः ॥ अचकाः ॥ अचकात् ॥ शासु अनुशिष्टौ ॥ शास्ति ॥
शास इदङ्हलोः ॥ शास उपधाया इत् स्यादङि हलादौ क्ङिति च ॥ शासिवसीति षत्वं
शिष्टः । शासति । शशास । शशासतुः । शास्तु । शिष्टात् । शिष्टां । शासतु । शाहौ । शास्तेः ॥ तस्या
भीयत्वेनासिद्धत्वाद्धेर्धिः ॥ शाधि । अशात् । अशिष्टां । अशासुः । अशाः । अशात् । शि
ष्यात् । सर्त्तिशास्त्यर्त्तिभ्यश्च ॥ एभ्यश्च्लेरङ् कर्त्तर्यर्थे लुङि । अशिषत् । अशासिष्यत् । शीङ् स्व
प्ने । शीङः सार्वधातुके गुणः ॥ शेते । शयाते । शीङो रुट् । झादेशस्यातः । शेरते । शेषे । शयाथे ।

× इति परस्मैपदं ॥ ×

शेध्वे। शये। शेवहे। शेमहे। शिश्ये। शयिता। शयिष्यते। शेतां। अशेत। अशयातां। अशेरत॥
शयीत। शयीयातां। शयीरन्। शयीथाः। शयीयाथां। शयिषीष्ट। अशयिष्ट। अशयि-
ष्यत। इङ् अध्ययने। इङिकावध्युपसर्गतो न व्यभिचरतः। अधीते। अधीयाते। अ-
धीयते। गाङ् लिटि। इङ्। अधिजगे। अध्येता। अध्येष्यते। अधीतां। अधीष्व। अ-
धीयाथां। अधीध्वं। अध्ययै। अध्ययावहै। अध्ययामहै। अध्यैत। अध्यैयातां।
अध्यैयत। अध्यैथाः। अध्यैयाथां। अध्यैध्वं। अध्यैयि। अध्यैवहि। अध्यै-
महि। अधीयीत। अधीयीयातां। अधीयीरन्। अध्येषीष्ट॥ विभाषा लुङ्लृङोः
इणो गाङ्। गाङ्कुटा [illegible] दिभ्यो ञ्णिन्ङित्। गाङादेशात् कुटादिभ्यश्च ञ्णित्तः प्रत्यया
ङितः स्युः। घुमास्थागापाजहातिसां हलि। एषामात ईत्स्याद्धलादौ क्ङिति आर्ध-
धातुके॥ अध्यगीष्ट। अध्यैष्ट। अध्यगीष्यत। अध्यैष्यत। ईर गतौ कंपने च।
ईर्ते। ईरांचक्रे। ईरिता। ईर्तां। ईर्ष्व। ईर्ध्वं। ईरिषे। ईड स्तुतौ। ईट्टे। ईशः से। ईडजनोर्ध्वे च

ईशीड्जनां से ध्वे शब्दयोः सार्वधातुकयोरिट् स्यात्॥ योगविभागो वैचित्र्यार्थः। ईडिषे।
ईडिध्वे। एकदेशविकृतस्यानन्यत्वादीडिष्व। ईडिध्वं। विकृतिग्रहणेन प्रकृतेर्ग्रहणात्
ऐड्ढ्वं। ईश ऐश्वर्ये। ईष्टे। ईशिषे। ईशिध्वे। आस उपवेशने। आस्ते। आसांचक्रे। आ
स्व। आध्वं। आसिष्ट। आङः शासु इच्छायां॥ आशास्ते। आशासाते। वस आच्छादने
वस्ते। वस्से। वध्वे। ववसे। वसिता। णिसि चुंबने। निंस्ते। णिजि शुद्धौ। निंक्ते। निंक्षे निं
जिता। वृजी वर्जने। वृंक्ते। वृंजाते। द्विदि द्विलन्ये। दंक्ते। पृची संपर्चने। पृंक्ते। षूङ् प्राणि
गर्भविमोचने॥ सूते। सुषुवे। सुषुविषे। सोता। सविता। सुवै। सविषीष्ट। सोषीष्ट। अ
सविष्ट। असोष्ट। चक्षिङ् व्यक्तायां वाचि। अयं दर्शनेपि। इकारोनुदात्तः। नुम
स्तुनः॥ अंत्यदित्त्वादितिव्याख्यानात्। चष्टे। चक्षाते। आर्धधातुके॥ चक्षिङः ख्या
ञ्वा लिटि॥ अयं भाष्ये शादिरयमादेशः॥ असिद्धकांडे शस्य यो वे[illegible] तिस्थितं॥

२।१

ॐ॥ दद्वयं। चख्यौ। चख्ये। चक्शौ। चक्शे। चचक्षे। ख्याता। क्शाता। ख्यास्यते। क्शास्यति। क्शास्यते। चष्टां। अचष्ट। अचक्षीत। ख्यायात्। ख्येयात्। ख्यासीष्ट। क्शायात्। क्शेयात्। क्शासीष्ट। अख्यत्। अख्यत। अक्शासीत्। अक्शास्त। वर्जने क्शाऽनेष्टः। समचक्षिष्टेत्यादि। दिह अप्रीतौ। देग्धि। दिग्धे। देग्धा। धेक्ष्यति। दिग्धि। देहानि। अदेक्। दिषक्ष्व। लङो लुङ्खा। अदिक्षुः। अदिक्षत्। दुह प्रपूरणे। दोग्धि। दुग्धः। दुहंति। धोक्षि। दुग्धे। दुहाते। दुहते। धुक्षे। धुग्ध्वे। दुहे। दुह्वहे। दुह्महे। दुदोह। दुदुहे। दोग्धा। धोक्ष्यति। धोक्ष्यते। दोग्धु। दुग्धात्। दुग्धां। दुहंतु। दुग्धि। दुग्धात्। दुग्धं। दुग्ध। दोहानि। दोहाव। दोहाम। दुग्धां। दुहातां। दुहतां। धुक्ष्व। दुहाथां। धुग्ध्वं। दोहै। दोहावहै। दोहामहै। अधोक्। अदुग्धां। अदुहन्। अधोक्। अदुग्धं। अदुग्ध। अदोहं। अदुह्व। अदुह्म। अदुग्ध। अदुहातां। अदुहत। अदुग्धाः। अदुहाथां। अधुग्ध्वं। अदुहि।

×आपापी स्यनुवर्तमाने स्नुग्रहणं सर्वादेशार्थं ॥२×

दोहि। अदुग्धहि। अदुह्महि। दुह्यात। दुह्यातां। दुहीत। दुहीयातां। दुक्षात। दुक्षातां। धुक्षीष्ट। अधुक्षत। लुग्वादुहदिहलिहगुहामात्मनेपदे दंत्ये। एषां क्सस्य लुग्वा दंत्ये तङि। अधुक्षत। अधुग्ध। क्सस्याचि। अजादौ तङि क्सस्य लोपः। अधुक्षातां। अधुक्षंत। अधुक्षथाः। अदुग्धाः। अदुक्षाथां। अधुक्षध्वं। अधुग्ध्वं। अधुक्षि। अधुक्षावहि। अदुग्धहि। अधुक्षामहि। अदुह्महि। अधोक्ष्यत। अधोक्ष्यत। एवं दिह उपचये॥ लिह आस्वादने। लेढि। लीढः। लिहंति। लेक्षि। लीढे। लिहाते। लिक्षे। लिहाथे। लीढ्वे। लेढु। लीढात। लीढां। लिहंतु। लीढि। लेहानि। लीढां। अलेट्। अलीढ। ब्रू व्यक्तायां वाचि। ब्रुवः पंचानामादित आहो ब्रुवः॥ ब्रुवो लटस्तिबादीनां पंचानां णलादयः पंच वास्युः ब्रुवश्चाहादेशः। आह। आहतुः। आहुः। आहस्थः॥ झलि॥ चर्त्वं। आत्थ। आहथुः। ब्रुवईट्। ब्रुवो हलादेः पितः सार्वधातुकस्येईट्। ब्रवीति। ब्रूतः। ब्रुवंति। ब्रूते। ब्रुवाते। ब्रुवते। ब्रुवो वचि। आर्द्धधातुके। उवाच। ऊचतुः। ऊचुः। उवचिथ। उवक्थ। ऊचे। वक्ता। वक्ष्यति। वक्ष्यते। ब्रवीतु। ब्रूतात। ब्रूतां। ब्रूहि। ब्रवाणि। ब्रवाव। ब्रवाम॥ ब्रूतां। ब्रवै॥ अब्रवीत॥ अब्रूत। ब्रूयात। ब्रुवीत॥

डुधाञ् धारणपोषणयोः॥ दधाति। दधस्तथोश्च॥ द्विरुक्तस्य धातो झषंतस्य बशो भष् तथयोः स्ध्वो श्च परतः॥ धत्तः। दधति। दधासि। धत्थ। धत्ते। धत्से। धद्ध्वे। धेहि। णिजिर् शौचपोषणयोः॥ निजां त्रयाणां गुणः श्लौ॥ णिज् विज् विष ामभ्यासस्य गुणः स्यात् श्लौ॥ नेनेक्ति। नेनिक्तः। नेनिजति। नेनिक्ते। नेनिजते। नेक्ता। नेक्ष्यति। नेक्ष्यते॥ नेनेक्तु। नेनिग्धि। नाभ्यस्तस्याचि पिति सार्वधातुके॥ लघूपधगुणो न॥ नेनिजानि। नेनिजै। अनेनेक्। अनेनिक्तां। अनेनिजं। अनेनिक्त। नेनिज्यात्। नेनिजीत। निज्यात्॥ नेक्षीष्ट। अनिजत्। अनैक्षीत्। अनिक्त। अनेक्ष्यत्। अनेक्ष्यत। एवं विजिर् पृथग्भावे। विष्लृ व्याप्तौ॥

॥ ॥इति जुहोत्यादि॥ दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकांतिगतिषु॥ दिवादिभ्यः श्यन्॥ शपोपवादः॥ हलि चेति दीर्घः॥ दीव्यति। दिदेव। देविता। देविष्यति। दीव्यतु। अदीव्यत्। दीव्येत्॥ दीव्यात्। अदेवीत्। अदेविष्यत्। एवं षिवु तंतुसंताने। सीव्यति। नृती गात्रविक्षेपे। नृत्यति। ननर्त। नर्तिता। सेसिचिकृतचृतछृदतृदनृतः॥ एभ्यः सिज्भिन्नस्य सादेरार्धधातुकस्येड्वा॥ नर्तिष्यति। नर्त्स्यति। नृत्यात्। अनर्तीत्। त्रसी उद्वेगे। वा भ्राशेति श्यन्वा॥ त्रस्यति। त्रसति। तत्रास। वा जृभ्रमुत्रसां।

ष्वां ढिति लिटि से ह्यलिच एवां भ्यास लोपो वा ।। त्रेसतुः । तत्रसतुः । त्रेसिथ । तत्रसिथ । त्रसिता
शोतनूकरणे ।। ओतः श्यनि । लोपः ।। श्यति ।। श्यतः । श्यंती ।। शशौ । शशतुः । शशुः । शाता ।
शास्यति । अशात् । अशातां । इटूसकौ । अशासीत् । षो छेदने । स्यति । षोंतकर्मणि । स्यति
ससौ । दो ऽवखंडने । द्यति । ददौ । देयात् । अदात् । व्यध ताडने । विध्यति । विव्याध । विवि
धतुः । विव्यधुः । विव्यधिथ । विव्यद्ध । व्यद्धा । व्यत्स्यति । विध्येत् । विध्यात् । अव्यात्सीत्
पुष पुष्टौ । पुष्यति । पुपोष । पुपोषिथ । पोष्टा । पोक्ष्यति । पुषादीत्यङ् । आपरस्मैपदात्
अपुषत् । शुष शोषणे । शुष्यति । शुशोष । अशुषत् । णश अदर्शने । नश्यति । ननाश ।
नेशतुः । रधादिभ्यश्च । रधुनशतृपदृपद्रुहमुहष्णुहष्णिहः एभ्यो वलाद्यार्धधातुकस्ये
वेट् । नेशिथ । मस्जिनशोर्झलि । नुम् । ननंष्ठ । नेशिव । नेशिव । नेशिम । नेश्म । नशिता । नंष्टा ।
नशिष्यति । नंक्ष्यति । नश्येत् । नश्यात् । अनशत् । प्रणश्यति । नशेः षांतस्य । लंन । प्र

नंष्टा। अंतग्रहणंभूतपूर्वप्रतिपत्त्यर्थं प्रनंक्ष्यति। रध हिंसासंराध्योः। रध्यति। रधिजभोर
चि। नुम्॥ ररंध। ररंधतुः। ररंधुः। ररंधिथ। ररंद्ध। ररंधिव। रेध्व। नेट्यलिटिरधेः। लिटि
जेइट्रिरधेर्नुम्नस्यात्॥ रधिता। रद्धा। रधिष्यति। रत्स्यति। अरुङि नुम्। अनिदितामिति
नलोपः॥ अरधत्। तृप प्रीणने। तृप्यति। अनुदात्तस्येत्यम्। ततर्पिथ। तत्रप्थ। ततर्प्थ। त
र्पिता। तर्प्ता। त्रप्ता। स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः॥ अतर्पीत्। अताप्सीत्।
अत्राप्सीत्। अतृपत्। दृप हर्षमोहनयोः॥ दृप्यतीत्यादि। रधादित्वादिमौ वेट्। अवमध्यमनु
दात्तता। द्रुह जिघांसायां। वा द्रुहेति घः। पक्षे ढः। दुद्रोहिथ। दुद्रोग्ध। दुद्रोढ। द्रोहिता। द्रोढा।
अद्रुहत्। मुह वैचित्त्ये। वैचित्त्यम विवेकः॥ मुह्यति। मुमोहिथ। मुमोग्ध। मुमोढ। मोहिता।
मोग्धा। मोढा। मोहिष्यति। मोक्ष्यति। अमुहत्। ष्णुह उद्गिरणे। स्नुह्यति। सुष्णोह। सुष्णो
हिथ। सुष्णोग्ध। सुष्णोढ। सुष्णुहिव। सुष्णुह्व। स्नोहिता। स्नोग्धा। स्नोढा। स्नोहिष्यति। स्नो
क्ष्यति। अस्नुहत्। ष्णिह प्रीतौ। स्निह्यति। सिष्णेह। स्नेहिता। स्नेग्धा। स्नेढा। अस्निहत्। शुषतुषो।

तुष्यति। दुष वैकृत्ये। दुष्यति। श्लिष आलिंगने॥ श्लिष्यति। श्लिष आलिंगने च्लेः क्सः॥ आश्लिक्षत् कन्यां
देवदत्तः। आलिंगने किं। समश्लिषज्जतुकाष्ठं। प्रत्यासत्तौ विहश्लिष्टि। क्रुध क्रोधे। क्रुध्यति। क्षुध बुभु
क्षायां। क्षुध्यति। शुध शौचे। शुध्यति। षिधु संराद्धौ॥ सिध्यति। शमु उपशमे। शमामष्टानां दीर्घः श्यनि॥ श
म तमु दमु श्रमु भ्रमु क्षमु क्लमु मदां॥ शाम्यति। शशाम। शेमतुः। शेमिथ। शमिता। अशमत्। श्रमु तपसि खेदे
च। श्राम्यति। अश्रमत्। भ्रमु अनवस्थाने। वा भ्राशेति श्यन्वा। भ्राम्यति। भ्रमति। अभ्रमत्। क्षमू सहने
क्षाम्यति। चक्षमिथ। चक्षंथ। चक्षमिव। चक्षण्व। क्षमिता। क्षंता। अयं न क्षित्। स्वादिस्तु क्षित्। आक्षि
तः। क्षाम्यतेः क्षांतिः क्षमूषः क्षमते क्षमा॥ क्लमु ग्लानौ। क्लाम्यति। क्लमिता। अक्लमत्। मदी हर्षे। मा
द्यति। अमदत्। असु क्षेपणे। अस्यति। आस। असिता। अस्यतेस्थुक्॥ आङि। आस्यत्। य
सु प्रयत्ने॥ यसोनुपसर्गात्। संयसश्च॥ श्यन्वा। यस्यति। यसति। संयस्यति। संयसति। अनुपस
र्गात् किं। प्रयस्यति। जसु मोक्षणे। जस्यति। तसु उपक्षये। दसु च। तस्यति। अतसत्। दस्यति। अदसत्
वसु स्तंभे। वस्यति। ववास। ववसतुः। ववसुः। वशादिरिति मते तु वेसतुः। वेसुः। व्युष विभागे। प्युष विभागे।

पुष्यति । बिस प्रेरणे । बिस्यति । अबिसत् । बुस उत्सर्गे । बुस्यति । मुस खंडने । मुस्यति । मसी परिणामे । परिणा-
मो विकारः । लुट विलोडने ॥ उच समवाये । उच्यति । उवोच । ऊचतुः । ऊचुः । भ्रंशु भ्रंशु अधःपतने । भ्रश्यति । बभ्रं-
श । अभ्रशत् । नलोपः । भ्रश्यति । बभ्रंश । अभ्रशत् ॥ वृश वरणे । वृश्यति ॥ ञितृष पिपासायां । तृष्यति ।
हृष तुष्टौ । श्यन्नङो भोवादिकाद्विशेषः । हृष्यति । अहृषत् । रुष रिष हिंसायां । तीषसहेति वेट् । रोषिता । रोष्टा । रेषि-
ता । रेष्टा । कुप क्रोधे । कुप्यति । गुप व्याकुलत्वे । गुप्यति । लुभ गार्ध्ये । गार्ध्यमाकांक्षा । लोभिता । लोब्धा । लोभि-
ष्यति । लुभादेरवत्करणे ब्धो भती त्यपीत्याहुः । क्षुभ संचलने । क्षुभ्यति । क्लिदू आर्द्रीभावे । क्लिद्यति । चिक्ले-
द । चिक्लेदिथ । चिक्लेत्थ । चिक्लिदिव । चिक्लिद्व । क्लेदिता । क्लेत्ता । ञिमिदा स्नेहने । मिदेर्गुणः ॥ इक्संज्ञ-
कशाकारादौ प्रत्यये । मेद्यति । अमिदत् ॥ ञिक्ष्विदा स्नेहनमोचनयोः ॥ क्ष्विद्यति । ऋधु वृद्धौ । ऋध्यति । आ-
नर्ध । गृधु अभिकांक्षायां । गृध्यति । अगृधत् । षूङ् प्राणिप्रसवे । सूयते । सुषुवे । क्रादिनियमादि-
ट् । सुषुविषे । सुषुविवहे । सुषुविमहे । सोता । सविता । दूङ् परितापे । दूयते । दीङ् क्षये । दीङो युडचि क्ङिति ।
दीङः परस्याजादेः क्ङित आर्धधातुकस्य युट् । वुग्युटा वुवङ्यणोः सिद्धौ वक्तव्यौ ॥ दिदीये । मीनातिमि-

नोति दीङो ल्यपि च। एषां मात्वं ल्यपि चादशित्येङ्गिमित्ते॥ दाता। दास्यते। अदास्त। डीङ् वि
हायसा गतौ। डीयते। पीङ् पाने। पीयते। माङ् माने। मायते। ममे। माता। जनी प्रादुर्भावे। ज्ञाजे
नोर्जा॥ शिति॥ जायते। जज्ञे। जनिता। जनिष्यते। दीपजनबुधपूरितायिप्यायिभ्योन्यत
रस्यां। एभ्यश्च्लेश्चिण् वा एकवचने तशब्दे परे॥ चिणो लुक्। चिण परस्य लुक्॥ जनिवध्योश्च।
न वृद्धिश्चिति णिति कृति च। अजनि। अजनिष्ट। दीपी दीप्तौ। दीप्यते॥ दिदीपे। अदी
पि। अदीपिष्ट। पद गतौ। पद्यते। पेदे। पत्ता। पद्येत। पत्सीष्ट। चिण ते पदः। च्लेः॥ अपादि।
अपत्सातां। अपत्सत। विद सत्तायां॥ विद्यते। वेत्ता। बुध अवगमने। बुध्यते। बोद्धा।
भोत्स्यते। भुत्सीष्ट। अबोधि। अबुद्ध। अभुत्सातां। युध संप्रहारे। युध्यते। युयुधे। यो
द्धा। अयुद्ध। सृज विसर्गे। सृज्यते। ससृजे। स्रष्टा। स्रक्ष्यते। सृक्षीष्ट। असृष्ट। अ
सृक्षातां। मीङ् हिंसायां। मीयते। रीङ् श्रवणे। रीयते। लीङ् श्लेषणे। विभाषा लीयतेः। लीङो

रालंवास्यादेज्विषयेल्यपिच॥ लीयतेरितियकारनिर्देशो नतुश्यनः॥ लेता। लाता। लेष्यते। लास्यते। एज्वि
षयेक्तिं। लिल्ये। व्रीङ् वृणोत्यर्थे। व्रीयते। विव्रिये। मृष तितिक्षायां॥ मृष्यति। मृष्यते। ममर्ष। ममर्षिथ॥
ममृषे। ममृषिषे। मर्षिता सि। मर्षितासे। मर्षिष्यति। मर्षिष्यते। णह बंधने। नह्यति। नह्यते।
ननाह। ननद्ध। नेहे। नद्धा। नत्स्यति। [illegible] रंज रागे। रज्यति। रज्यते। शप आक्रोशे॥
शप्यति। शप्यते। शक विभाषितो मर्षणे। विभाषित इत्युभयपदीत्यर्थः। शक्यति। शक्य
ते। हर्तुं दुष्टं भक्ताः। शशाक। शेकिथ। शशक्थ। शेके। शक्ता। शक्ष्यति। शक्ष्यते। शक्ष्येते॥
पुषादित्वादङ्। अशकत्। अशक्त। सिद्धोयमित्येके। तन्मतेनानिडेषु लृदित्यटितः॥
शकिता। शकिष्यति। शकिष्यते॥ ॥इति दिवादिः॥ षुञ् अभिषवे। स्वादिभ्यश्नुः॥ श
षोपवादः॥ सुनोति। सुनुतः। हुश्नुवोरितियण्॥ सुन्वंति। सुन्वः। सुनुवः। सुनुते। सुन्वाते॥
सुन्वते। सुषाव। सुषुवे। सोता। सुनवानि। सुनवै। सुनुयात्। सूयात्। स्तुसुधूञ्भ्यः परस्मैपदेषु॥

सिचइट्। अस्तावीत्। अस्तोष्ट। अभिष्टुणोति। अभ्यषुणोत्। सुनोतेः स्य सनोः॥ ससषोन। विसो
ष्यति। षिञ् बंधने। विसिनोति। चिञ् चयने। चिनोति। चिनुते। विभाषाचेः॥ अभ्यासात्कुत्वं वास
न्लिलिटि च। चिकायौ। चिक्ये। चिच्ये। अचैषीत्। अचेष्ट। अचेष्यत्। अचेष्यत। स्तृञ् आच्छादने॥
स्तृणोति। स्तृणुते। तस्तार। तस्तरतुः। तस्तरे। गुणोर्तीति गुणः। स्तर्यते। ऋतश्च संयोगादेः। ऋदंतात्सं
योगादेर्लिङ् सिचो रिड्वा तङि॥ स्तरिषीष्ट। स्तृषीष्ट। अस्तरिष्ट। अस्तृत। धुञ् कंपने। धुनोति। धुनुते
दुधाव। दुधुवे। अधौषीत्। अधोष्यत। धूञ् कंपने। धूनोति। धूनुते। स्वरतीति वेट्। दुधविथ। दु
धोथ। श्रितिलिटि तु। श्युकः किति। श्रिय एकाच उगंतात् गित् किन्तोरिट् न इति प्राप्ते॥ क्रादिनियमान्नि
त्यमिट्। दुधुविव। अधावीत्। अधविष्ट। अधोष्ट। कृञ् हिंसायां। कृणोति। कृणुते। चकार। चकर्थ। चक्रे।
क्रियात्। कृषीष्ट। अकार्षीत्। अकृत। वृञ् वरणे। वृणोति। वृणुते। वभूथ आततंथ जगृभ्म ववर्थेति निगमे।
~~[illegible]~~ एवावेदे इड्भावो निपात्यते॥ तेन भाषायां थलीट्। ववरिथ।
ववृव। ववृवहे। वरिता। वरीता। वरिष्यति। वरीष्यति। वरिष्यते। वरीष्यते। लिङ्सिचोरात्मनेपदेषु॥ वृङ्

ऋभ्यामृदंताच्चपरयोः। लिङ्सिचोरिड्वा तङि। न लिङि। इत इटो न दीर्घः। वरिषीष्ट। वृषीष्ट। अवा
रीत। अवरिष्ट। अवरीष्ट। अवृत। टुदु उपतापे। दुनोति। हि गतौ। वृद्धौ च। हिनुमीना॥ उपसर्गस्था
न्निमित्तात्परस्यैतयोर्नस्य णः॥ प्रहिणोति। हेरचङि॥ अभ्यासाद्धिनोतेर्हस्य कुत्वं न तु चङि। जिघाय॥
आप्लृ व्याप्तौ॥ आप्नोति। आप्नुतः। आप्नुवंति। आप्नुहि। लृदित्वादङ्। आपत्। शक्लृ शक्तौ। शक्नोति॥
अशकत्। राध साध संसिद्धौ। राध्नोति। राध्नुतः। राधो हिंसायां। एत्वाभ्यासलोपौ स्तः। किति लिटि सेटि
थलि च। अपरेधतुः। रेधिथ। राद्धा। साध्नोति। ससाध। साद्धा। असात्सीत्। असाद्धां। ञिधृषा प्राग
ल्भ्ये। धृष्णोति। दधर्ष। धर्षिता। दंभ दंभने। दभ्नोति। ददंभ। श्रंथिग्रंथिदंभिस्वंजीनां लिटः कित्वं
वा। कित्वपक्षे नलोपः। तस्याभीयत्वादसिद्धत्वेनैत्वाभ्यासलोपयोरप्राप्तौ। दंभेश्च। एत्वाभ्यासलोपौ
त्वा
स्तः किति लिटि सेटि थलि च। देभतुः। ददंभतुः। दंभिता। दभ्यात्। तृप प्रीणने। क्षुभ्नादिषु च। णत्वं
न। तृप्नोति। अशू व्याप्तौ संघाते च। अश्नुते। अश्नोतेश्च। दीर्घादभ्यासादवर्णात्परस्य नुट्॥ आ
नशे। अशिता। अष्टा। अशिष्यते। अक्ष्यते। अश्नुवीत। अशिषीष्ट। अक्षीष्ट। आशिष्ट। आष्ट

ज्या ३

६६

आपातां ।। इति स्वादयः ।। तुद व्यथने । तुदादिभ्यः शः ।। शपोपवादः । तुदति । तुदते । तुतो
द । तुतोदिथ । तुतुदे । तोत्ता । अतौत्सीत् । अतुत्त । णुद प्रेरणे । नुदति । नुदते । नुनोद । नोत्ता । भ
स्ज पाके । ग्रहिज्या० सस्य श्चुत्वेन शः । झस्य जश्त्वेन जः । भृज्जति । भृज्जते । भ्रस्जो रोपधयोरमन्य
तरस्यां । भ्रस्जेरेफस्योपधायाश्च स्थाने रमागमो वार्धधातुके ।। मित्वादंत्यादचः परः स्था
न षष्ठी निर्देशात् रोपधयोर्निवृत्तिः । बभर्ज । बभर्जतुः । बभर्जुः । बभर्जिथ । बभर्ष्ठ । बभ्रज्ज
बभ्रज्जतुः । बभ्रज्जुः । बभ्रज्जिथ । स्कोरिति सलोपः । बभ्रष्ठ । बभर्जे । बभ्रज्जे । भर्ष्टा । भ्रष्टा । भ
र्क्ष्यति । भ्रक्ष्यति । क्ङिति रमागमं बाधित्वा संप्रसारणं पूर्वविप्रतिषेधेन । भृज्ज्यात् । भृज्ज्या
स्तां । भृज्ज्यासुः । भर्क्षीष्ट । भ्रक्षीष्ट । अभार्क्षीत् । अभ्राक्षीत् । अभर्ष्ट । अभ्रष्ट । अभर्ष्ट ।।
कृष विलेखने । कृषति । कृषते । चकर्ष । कृष्टा । कर्ष्टा । कृक्षीष्ट । अकार्क्षीत् । अक्राक्षी
त् । अकृक्षत् । अकृष्ट । अकृक्षातां । अकृक्षत । मिल संगमे । मिलति । मिलते । मिमेल ।
मेलिता । अमेलीत् । मुच्लृ मोक्षणे । शे मुचादीनां । मुच् लुप् विद् लिप् सिच् कृत् खिद् पिशां

मुच्। मुंचति। मुंचते। मोक्ता। मुच्यात्। मुक्षीष्ट। अमुचत्। अमुक्त। अमुक्षातां। लुप्लृ छेदने। लुंपति। लुंपते। लोप्ता। अलुपत्। अलुप्त। विद्लृ लाभे॥ विंदति। विंदते। विवेद। विविदे। व्याघ्रभूतमतेसेट्। भाष्यमते त्वनिट्। परिवेत्ता। षिच क्षरणे। सिंचति। सिंचते। असिचत्। असिचत। असिक्त। लिप् उपदेहे॥ उपदेहो वृद्धिः॥ लिंपति। लिंपते। लेप्ता। अलिपत्। अलिपत। अलिप्त। कृती छेदने। कृंतति। चकर्त्त। कर्त्तिता। कर्त्तिष्यति। कर्त्स्यति। अकर्त्तीत्। खिद परिघाते। खिंदति। चिखेद। खेत्ता। पिश अवयवे। पिंशति। पेशिता। ओव्रश्चू छेदने। वृश्चति। वव्रश्च। वव्रश्चिथ। वव्रष्ठ। व्रश्चिता। व्रष्टा। व्रश्चिष्यति। व्रक्ष्यति। वृश्च्यात्। स्कोरिति सलोपः। अव्राक्षीत्। व्यच व्याजीकरणे॥ विचति। विव्याच। विविचतुः। व्यचिष्यति। विच्यात्। अव्याचीत्। अव्यचीत्। व्यचेः कुटादित्वमनसीति तु नेह प्रवर्त्तते। अनसीति पर्युदासेन कृन्मात्रविषयत्वात्। उछि उञ्छे। उञ्छः कणश आदानं कणिशाद्यर्जनं शिलमिति यादवः। उंछति। ऋछ गतीन्द्रियप्रलयमूर्त्तिभावेषु॥ ऋच्छति॥ ऋच्छत्यृतामिति गुणः॥ द्विहल्ग्रहणस्यानेकहल्उपलक्षणत्वान्नुट्॥ आनर्छ। आनर्छतुः॥ ऋच्छिता। उज्झ उत्सर्गे। उज्झति। लुभ विमोहने। लुभति। लोभिता। लोब्धा। लोभिष्यति। तृप तृम्फ तृप्तौ॥ तृपति। ततर्प। तर्पिता। अतर्पीत्। शे तृम्फादीनां नुम् वाच्यः॥ आदिशब्दः प्रकारे तेन येन्न नकारा

तुषत्कास्तेतंक्रादयः। तंफति। तफ्यात्। मुंम्डसुखने। पृडच। मृडति। पृडति। शुनगतौ। शुनति। इ
षइच्छायां। इच्छति। एषिता। एष्टा। एषिष्यति। इष्यात्। ऐषीत्। कुटकौटिल्ये। गाङ्कुटादीतिङित्वं॥
चुकुटिथ। चुकोट। चुकुट। कुटिता। पुटसंश्लेषणे। पुटति। पुपोट। पुटिता। स्फुटविकसने। स्फु
टति। स्फुटिता। स्फुरस्फुलसंचलने। स्फुरति। स्फुलति। स्फुरतिस्फुलत्योर्निर्निविभ्यः। षत्वंवा।
निःस्फुरति। निष्फुरति। णूस्तवने। परिणूतगुणोदयः। नुवति। नुनाव। नुविता। टुमस्जोशु
द्धौ। मज्जति। ममज्ज। मस्जिनशोर्झलीति नुम्। मस्जेरन्त्यात्पूर्वोनुम्वाच्यः। संयोगादिलोपः। मम
ङ्क्थ। ममज्जिथ। मंक्ता। मंक्ष्यति। अमांक्षीत्। अमांक्तां। अमांक्षुः। रुजोभंगे। रुजति। रोक्ता। रोक्ष्य
ति। अरौक्षीत्। भुजोकौटिल्ये रुजिवत्। विशप्रवेशने। विशति। मृशआमर्षणे। आमर्षणं
स्पर्शः। मृशति। अम्राक्षीत्। अमार्क्षीत्। अमृक्षत्। षद्लृविशरणगत्यवसादनेषु। सीदतीत्या
दि। शद्लृशातने। शदेःशितः। शिद्भाविनोस्मात्तङानौस्तः॥ शीयते। शीयतां। अशीयत। शीयेत। शशाद।
शत्ता। शत्स्यति। अशदत्। अशत्स्यत्। कॄविक्षेपे। ॠतइद्धातोः॥ किरति। चकार। चकरतुः। चकरुः॥

करिता। करीता। कीर्यादा अकारीत। किरतौ लवणे। उपात्किरतेः सुट् छेदने र्थे। उपस्किरति। अड्व्यासव्यवायेपि। सुट्कात्पूर्वइति वक्तव्यं। उपास्किरत। उपचस्कार। हिंसायांप्रतेश्च। उपात्प्रतेश्च किरतेः सुट् हिंसायां। उपस्किरति। प्रतिस्किरति। गॄनिगरणे। अचिविभाषा। गिरतेरेफस्य लोजादौ प्रत्यये। गिरति। गिलति। जगार। जगाल। जगरिथ। जगलिथ। गरिता। गरीता। गलिता। गलीता। प्रछज्ञीप्सायां॥ ग्रहिज्या। पृच्छति। पपृच्छ। पप्रच्छतुः। पप्रच्छुः। प्रष्टा। प्रक्ष्यति। अप्राक्षीत। मृङ्प्राणत्यागे। म्रियते लुङ्लिङोश्च॥ लुङ्लिङोः शितश्चप्रकृतिभूतात्मृङस्तङानोनान्यत्र। ङित्वं स्वरार्थं। रिङ्। इयङ्। ममार। ममर्थ। मम्रिव। मम्रिम। मर्ता। मरिष्यति। मृषीष्ट। अमृत। पृङ्व्यायामे। प्रायेणायंव्याङ्पूर्वः॥ व्याप्रियते। व्यापप्रे। व्यापप्राते। व्यापप्रिरे। व्यापरिष्यते। व्यापृत। व्यापृषातां। जुषीप्रीतिसेवनयोः। जुषते। जुजुषे। ओविजीभयसंचलनयोः॥ प्रायेणायमुत्पूर्वः। उद्विजते। विजइट्॥ विजेपरस्यइडादिप्रत्ययोङित्। उद्विजिता। उद्विजिष्यते। ओलजी ओलस्जी व्रीडने। लजते। लेजे। लज्जते।

ललज्जे॥ ॥इति तुदादिः॥ रुधिर् आवरणे॥ रुधादिभ्यः श्नम्। शपोपवादः॥ रुणद्धि॥
श्नसोरल्लोपः। रुन्धः। रुन्धंति। रुणत्सि। रुन्धः। रुन्ध। रुणध्मि। रुन्ध्वः। रुन्ध्मः॥ रु
न्धे। रुन्धाते। रुन्धते। रुंत्से। रुन्धाथे। रुंध्वे। रुन्धे। रुन्ध्वहे। रुन्ध्महे। रुरोध। रोद्धा॥
रोत्स्यति। रोत्स्यते। रुणद्धु। रुन्धात्। रुन्धां। रुन्धंतु। रुन्धि। रुणधानि। रुणधाव। रुणध
म। रुन्धां। रुन्धातां। रुंत्स्व। रुणधै। रुणधावहै। रुणधामहै। अरुणत्। अरुंधां। अ
रुंधन्। अरुणत्। अरुणः। अरुन्धं। अरुन्ध। अरुणधं। अरुन्ध्व। अरुंधत। अ
रुंधातां। अरुंधत। रुंध्यात्। रुधीत। रुध्यात्। रुत्सीष्ट। अरुधत्। अरौत्सीत्। अरो
त्स्यत्। अरोत्स्यत। भिदिर् विदारणे। भिनत्ति। भिंत्ते। छिदिर् द्वैधीकरणे। छिनत्ति। छिं
त्ते। युजिर् योगे। युनक्ति। युंक्ते। रिचिर् विरेचने। रिणक्ति। रिंक्ते। रिरेच। रेक्ता। अरिणक्।
अरिचत्। अरैक्षीत्। अरिक्त। विचिर् पृथग्भावे। विनक्ति। विंक्ते। क्षुदिर् संपेषणे।
क्षुणत्ति। क्षुंत्ते। क्षोत्ता। अक्षुदत्। अक्षौत्सीत्। उछृदिर् दीप्तिदेवनयोः। छृणत्ति। छृंत्ते।

च्छर्द। से सिची तिवेट्। चच्छृदिषे। चच्छृत्से। छर्दिता। छर्दिष्यति। छर्त्स्यति। अच्छदत्। अच्छर्दीत्।
अच्छर्दिष्ट। उतृदिर् हिंसानादरयोः। तृणत्ति। तृन्ते। इतीवेष्टने। छृणत्ति। तृह हिसि हिंसायां
तृणह इम्। तृहः श्नमिकृते इम् हलादौ पिति सार्वधातुके। तृणेढि। तृण्ढः। ततर्ह। तर्हिता। अतृणेट्।
श्नान्नलोपः। हिनस्ति। जिहिंस। हिंसिता। उन्दी क्लेदने। उनत्ति। उन्तः। उन्दन्ति। उन्दाञ्चकार। औनत्। औ
नः। औदन्। औनः। औनदं। औनद्म। अञ्जू व्यक्तिम्लक्षणकान्तिगतिषु। अनक्ति। अंक्तः। अञ्जन्ति।
आनञ्ज। आनञ्जिथ। आनङ्क्थ। अञ्जिता। अंक्ता। अङ्ग्धि। अनजानि। आनक्। अञ्जेः सिचि।
अञ्जेः सिचो नित्यमिट्। आञ्जीत्। तञ्चू संकोचने। तनक्ति। ततञ्च। तञ्चिता। तंक्ता। ओविजि भयचलन
योः। विनक्ति। विंक्तः। विजइडिति ङित्वं। विविजिथ। विजिता। अविनक्। अविजीत्। शिष्लृ वि
शेषणे। शिनष्टि। शिंष्टः। शिंषन्ति। शिनक्षि। शिशेष। शिशेषिथ। शेष्टा। शेक्ष्यति। हेर्धिः। जश्त्वं। ष्टुत्वं। ऊ
रोऊरीतिङ्लोपो वा। अनुस्वारपरसवर्णौ। शिण्ढि। शिण्ड्ढि। शिनषानि। शिष्यात्। अशिषत्। अ
शेक्ष्यत्। एवं पिष्लृ संचूर्णने। पिनष्टि। भञ्जो आमर्दने। भनक्ति। बभञ्जिथ। बभङ्क्थ। भंक्ता। भुज पालनाभ्य

वहारयोः।भुनक्ति।भोक्ता।भोक्ष्यति।अभुनक्।भुजोनवने।तङानौस्तः।ओदनंभुङ्क्ते।अनवनेकिं।महींभुनक्ति
।ञिइंधीदीप्तौ।।इंधे।इंधाते।इंधते।इंत्से।इंधांचक्रे।इंधिता।इंधां।इंधातां।इंधतां।इनधै।ऐंध।
ऐंधातां।ऐंधत।ऐंधाः।ऐंधाथां।विदविचारणे।विंत्ते।वेत्ता।। ।।इतिरुधादिः।तनुविस्तारे।तनादिकृ
ञ्भ्यउः।।शपोपवादः।।तनोति।तनुते।ततान।तेने।तनिता।तनिष्यति।तनिष्यते।तनोतु।तनुतां।।
अतनोत्।अतनुत।तनुयात्।तन्वीत।तन्यात्।तनिषीष्ट।अतनीत्।अतानीत्।तनादिभ्यस्त
थासोः।।तनोतेः।सिचोवालुक्तथासोः।अतत।अतनिष्ट।अतथाः।अतनिष्ठाः।अतनिष्य
त्।अतनिष्यत।षणुदाने।सनोति।सनुते।सायात्।सन्यात्।असनीत्।असनत्।जनसनख
नांसञ्झलोः।।एषामाकारोझलादौसनिझलादौक्ङितिच।असात्।असनिष्ट।असाथाः।असनि
ष्ठाः।।क्षणुहिंसायां।क्षणोति।क्षणुते।ह्म्यंतेतिनवृद्धिः।अक्षणीत्।अक्षत।अक्षणिष्ट।
अक्षथाः।अक्षणिष्ठाः।क्षिणुच।उप्रत्ययेलघूपधगुणोवा।क्षिणोति।क्षेणोति।क्षेणिता।।
अक्षेणीत्।अक्षित।अक्षेणिष्ट।तृणुअदने।तृणोति।तर्णोति।तृणुते।तर्णुते।डुकृञ्करणे।।

करोति। अत उत्सार्वधातुके। कुरुतः। नभकुर्छुरां। भस्य कुर्छुरोरुपधाया न दीर्घः॥ कुर्वंति॥
नित्यं करोतेः। करोतेः प्रत्यये कारस्य नित्यं लोपो म्वोः। कुर्वः। कुर्मः। कुरुते। चकार। चकर्थ। चकृ
व। चक्रे। कर्ता। करिष्यति। करिष्यते। करोतु। कुरुतां। अकरोत्। अकुरुत। ये च। कृञ उ
लोपो यादौ प्रत्यये। कुर्यात्। कुर्वीत। क्रियात्। [illegible]ष्ट। अकार्षीत्। अकृत। अकरि
ष्यत्। अकरिष्यत। संपरिभ्यां करोतौ भूषणे समवाये च सुट्। संस्करोति। अलंकरोतीत्य
र्थः॥ संकुर्वंति। संघीभवंतीत्यर्थः। संपूर्वस्य क्वचिदभूषणेपि सुट्। संस्कृतं भक्ष्या इति ज्ञा
पकात्॥ उपात्प्रतियत्नवैकृतवाक्याध्याहारे च। कृञः सुट्। चोत्सागुक्तयोरर्थयोः॥ प्र
तियत्नो गुणाधानं॥ विकृतमेव वैकृतं विकारः॥ वाक्याध्याहारः आकांक्षितैकदेशपूरणं॥ उप
स्कृता कन्या। उपस्कृता ब्राह्मणाः॥ एधोदकस्योपस्कुरुते। उपस्कृतं भुंक्ते। उपस्कृतं ब्रूते॥
वनु याचने। वनुते। ववने। मनु अवबोधने। मनुताववोतेभ। मेनुते। मेने। मनिता॥ म
निष्यते। मनुतां। अमनुत। मन्वीत। मनिषीष्ट॥ ॥ इति तनादिः॥ डुक्रीञ् द्रव्यविनिमये॥

क्र्यादिभ्यः श्ना। शपोपवादः॥ क्रीणाति। ई हल्यघोः॥ क्रीणीतः॥ श्नाभ्यस्तयोरातः॥ लोपः क्ङिति
सार्वधातुके। क्रीणंति। क्रीणासि। क्रीणीथः। क्रीणीथ। क्रीणामि। क्रीणीवः। क्रीणीमः॥ क्रीणी
ते। क्रीणाते। क्रीणते। क्रीणीषे। क्रीणाथे। क्रीणीध्वे। क्रीणे। क्रीणीवहे। क्रीणीमहे। चिक्राय॥
चिक्रियतुः। चिक्रियुः। चिक्रियिथ। चिक्रेथ। चिक्रिय। क्रेता। क्रेष्यति। क्रेष्यते। क्रीणातु। क्री
णीतात्। क्रीणीतां। क्रीणंतु। क्रीणीहि। क्रीणीतात्। क्रीणीतां। क्रीणातां। क्रीणातां। क्रीणीयात्
क्रीणीत। क्रीयात्। क्रेषीष्ट। अक्रैषीत्। अक्रेष्टां। अक्रेष्ट। अक्रेष्यत्। अक्रेष्यत। प्री
ञ् तर्पणे कांतौ च॥ प्रीणाति। प्रीणीतः। प्रीणीते। प्रीणाते। श्रीञ् पाके। श्रीणाति। श्रीणाते
मीञ् हिंसायां। प्रमीणाति। प्रमीणीते॥ मीनातीत्यात्वं। ममौ। मिम्यतुः। ममिथ। ममाथ। मि
म्ये। माता। मास्यति। मीयात्। मासीष्ट। अमासीत्। अमासिष्टां। अमास्त॥ षिञ् बंधने॥
सिनाति। सिनीते सिषाय। सिष्ये। सेता। स्कुञ् आप्रवणे। स्तंभुस्तुंभुस्कंभुस्कुंभुस्कुञ्
भ्यः श्नुश्च। चात् श्ना। स्कुनोति। स्कुनुते। स्कुनाति। स्कुनीते। चुस्काव। चुस्कुवे। स्कोता॥

अस्कोषीत्। अस्कोष्ट। स्तंभादयश्चत्वारः सौत्राः सर्वे रोधनार्थाः परस्मैपदिनः॥ हलः श्नः शानज्झौ। स्त
भान॥ जॄस्तंभुम्रुचुम्लुचुग्रुचुग्लुचुग्लुंचुश्विभ्यश्च॥ च्लेरङ्वा। व्यष्टभत्। अस्तंभीत्॥ युञ् बंधने॥
युनाति। युनीते। योता॥ क्नूञ् शब्दे॥ क्नूनाति। क्नूनीते। क्नविता। द्रूञ् हिंसायां॥ द्रूणाति। द्रूणीते। पूञ् पव
ने। प्वादीनां ह्रस्वः॥ पूञ् लूञ् स्तॄञ् कॄञ् वॄञ् धूञ् शॄ पॄ वॄ भॄ मॄ दॄ जॄ झॄ धॄ नॄ कॄ ऋ गॄ ज्या री ली
व्ली प्ली एषां चतुर्विंशतेर्ह्रस्वः शिति। पुनाति। पुनीते। पविता। लूञ् छेदने। लुनाति। लुनीते। स्तॄञ्
आच्छादने। स्तृणाति। स्तृणीते। तस्तार। तस्तरतुः। तस्तरुः। तस्तरे। स्तरिता। स्तरीता। स्तृणीयात्।
स्तॄ। ऋत इद्धातोः। हलि चेति दीर्घः। स्तीर्यात्। लिङ्सिचोरिति वेट्। न लिङीति इटो दीर्घनि
षेधः। स्तरिषीष्ट। उश्चेति कित्वं। स्तीर्षीष्ट। सिचि च परस्मैपदेषु॥ अस्तारीत्। अस्तारिष्टां। अस्ता
रिषुः। अस्तरिष्ट। अस्तरीष्ट। अस्तीर्ष्ट। कॄञ् हिंसायां। कृणाति। कृणीते। चकार। चकरे। वॄञ् व
रणे। वृणाति। वृणीते। ववार। ववरे। वरिता। उदोष्ठ्येत्युत्वं। वूर्यात्। वरिषीष्ट। वूर्षीष्ट। अवारीत्॥

अवारिष्टां। अवरिष्ट। अवरीष्ट। अवृर्षत। धूञ् कंपने। धुनाति। धुनीते। दुधविथ। दुधोथ। दु
धविव। धोता। धविता। स्तुसुधूञ्भ्यः परस्मैपदेषु॥ सिचि वृद्धिः। स्वरतीति विकल्पे प्राप्ते नित्यमिड्
धिः। अधावीत्। अधविष्टा। अधोष्ट। ग्रह उपादाने। गृह्णाति। गृह्णीते। जग्राह। जगृहे। ग्र
हो लिटि दीर्घः॥ एकाचो ग्रहो विहितस्येटो दीर्घो न तु लिटि। ग्रहीता। गृह्णातु। गृहाण। गृह्यात्।
ग्रहीषीष्ट। ह्म्यंतेति न दीर्घः। अग्रहीत्। अग्रहीष्टां। अग्रहीषुः। अग्रहीष्ट। अग्रहीषातां। कुष नि
ष्कर्षे। कुष्णाति। कोषिता। निरः कुषः। वलादेरार्धधातुकस्येड्वा। निष्कोषिता। निष्कोष्टा। निरकोषीत्
निरकुक्षत्। अश भोजने। अश्नाति। आश। अशिता। अशिष्यति। अश्नातु। अशान। ज्ञा अव
बोधने। जानाति। जज्ञौ। पॄ पालनपूरणयोः। [illegible] पृणाति। शॄ हिंसायां। शृणाति॥ शॄ दॄ
प्रां ह्रस्वो वेति ह्रस्वपक्षे यण्। शश्रतुः। शशरतुः। दॄ विदारणे। दृणाति। ददरतुः। दद्रतुः।
जॄ वयोहानौ। जृणाति। मुष स्तेये। मुष्णाति। मोषिता। पुष पुष्टौ। पुष्णाति। पोषिता॥

वृद्धिः ५

वंध वंधने।वध्नाति।ववंधिथ।ववंध।वंधा।भंत्स्यति।क्लिशू विवाधने।क्लिश्नाति।क्लेशिता।
क्लेष्टा।अक्लेशीत्।अक्लिक्षत्।वृङ् संभक्तौ।वृणीते।ववृषे।ववृढ्वे।वरिता।वरीता
अवरिष्ट।अवरीष्ट।अवृत॥इति क्र्यादयः॥चुर स्तेये॥सत्यापपाशरूपवीणातूल
श्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्॥स्वार्थे।पुगंतेति गुणः॥सनाद्यंता इति धा
तुत्वं।तिप्।शवादि।गुणायादेशौ॥चोरयति।णिचश्च।णिजंतादात्मनेपदं स्यात् कर्तृगामि
नि क्रियाफले॥चोरयते॥चोरयामास॥चोरयिता॥चोर्यात्॥चोरयिषीष्ट।णिश्रीति चङ्।णि
लोपः॥णौ चङ्युपधाया ह्रस्वः॥चङीति द्वित्वं।हलादिशेषः।दीर्घो लघोरित्यभ्यासदीर्घः।अचूचुरत्।अचू
चुरतां।अचूचुरत।चिति स्मृत्यां।चिंतयति।अचिचिंतत्।चिंतेति पठित्वेइदित्करणं णिचः पाक्षि
कत्वे लिंगं।तेन चिंत्यादीन लोपोन।चिंतति।चिंतते।इत्यादि।यत्रि संकोचे।यंत्रयति।यंत्रेति पठित्तुं शक्यं
यत्तु इदित्करणं यंत्रतीति माधवेनोक्तं तच्चिंत्यं कुद्रि अनृतभाषणे।तत्रिकुवंदुंवधारणे।मत्रि गुप्तप

दित्या २

रिभाषणे॥ तंत्रयते। मंत्रयते। एतावात्मनेपदिनौ॥ स्फुडि परिहासे। स्फुंडयति। पीड अवगाहे॥ पी
डयति। भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्यां॥ एषामुपधाया ह्रस्वो वा॥ च
ङ्परेणौ॥ अपीपिडत्। अपिपीडत्। प्रथ प्रख्याने। प्राथयति। अत्स्मृदृत्वरप्रथम्रदस्तृ
स्पशां॥ एषामभ्यासस्याकारश्चङ्परेणौ॥ इत्वापवादः। अपप्रथत्। पृथ प्रक्षेपे। पर्थयति। उः ऋ
त्। उपधाया ऋवर्णस्य ऋद्वा चङ्परेणौ इररामपवादः। अपीपृथत्। अपपर्थत्। लुंट स्तेये
लुंटयति। अलुलुंटत्। तड आघाते। ताडयति। अतीतडत्। मडि भूषायां हर्षे च। मंडयति। अम
मंडत्। भडि कल्याणे। भंडयति। अबभंडत्। छर्द वमने। छर्दयति। अचछर्दत्। चुद संचो
दने॥ चोदयति। अचूचुदत्। पाल रक्षणे। पालयति। अपीपलत्। पूज पूजायां। पूजयति। अ
पूपुजत्। कृत संशब्दे। उपधायाश्च॥ धातोरुपधाभूतस्य ऋत इत् रपरत्वं॥ उपधा
यांचेति दीर्घः॥ कीर्तयति। अचीकृतत्। अचिकीर्तत्॥ म्लेछ अव्यक्तायां वाचि।

लोचयति। अमिन्नेछत। ईड स्तुतौ। ईडयति। पिडि संघाते। पिंडयति। रुष रोषे। रोषयति।
अन्तृ रुषत। तुल उन्माने। तोलयति। स्तुल्व माने। स्तुल्वयति। अस्तुस्तुल्वत। घुषिर
अविशब्दने। घोषयति। अजूघुषत। पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि
त्रसि पिसि कुसि दशि कुशि घट घटि वृहि बर्ह बल्ह गुप धूप पि चीव पुथ लोक्र लोच एण
दकुप तर्क वृतु वृधु भाषार्थाः। पाटयति। पोटयति। लोटयति। तुजयति। एवं परेषां घाट
यति। घंटयति। नाग्लोपि शास्वृदितां॥ णिच्यग्लोपिनः शास्तेः ऋदितां चोपधाया ह्रस्वो न चङ
परे णौ॥ अलुलोकत्॥ अलुलोचत्॥ वर्तयति॥ वर्धयति॥ आधृषाद्वा॥ इत ऊर्ध्वं विभा
षितणिच्। धृष धातुमभिव्याप्य॥ युज स्व संयमने। योजयति। योजति। अयोजीत्। पर्चयति॥
पर्चति। पर्चिता॥ अपर्चीत्। अर्च पूजायां॥ अर्चयति। अर्चति। षह मर्षणे। साहयति। स एव
यं नागः सहति कलभेभ्यः परिभवं। वृञ् वरणे। वारयति। वरति। वरते। ज्रि वयोहानौ। जारयति

जरति। शिष असर्वोपयोगे। शेषयति। शेषति। शेष्टा॥ अशिशात्। तप दाहे। तापयति। तपति। त
प्ता। तृप तृप्तौ। तर्पयति। तर्पति। हिसि हिंसायां। हिंसयति। हिंसति। अर्ह पूजायां। छद अप
वारणे। स्वरितेत्। छादयति। छदति। धूञ् कंपने। धूञ् प्रीञोर्नुक्। णौ॥ धूनयति। धवते
प्रीञ् तर्पणे। प्रीणयति। प्र[illegible]ति। प्रयते। वच परिभाषणे। वाचयति। वचति। वचते। वक्ता।
अवाचीत्। मान पूजायां। मानयति। मानति। मानिता। भू प्राप्तौ। आत्मनेपदी। भावयति
भवते। णिच्संनियोगेनैवात्मनेपदमित्येके। भवति। मार्ग अन्वेषणे। मार्गयति। मार्ग
ति। धृष प्रसहने। धर्षयति। धर्षति॥ अथादन्ताः। कथ वाक्यप्रबंधे। अल्लोपः। अ
चः परस्मिन् पूर्वविधौ॥ परनिमित्तोजादेशः स्थानिवत् स्यात् स्थानीभूतादचः पूर्व
त्वेन दृष्टस्य विधौ कर्तव्ये। इति स्थानिवत्त्वान्नोपधावृद्धिः। कथयति। अल्लोपित्वादी
र्घसन्वद्भावौ न। अचकथत्। गण संख्याने। गणयति। ई च गणः। गणयतेरभ्यासस्य

य२

ति

ईत्स्याङ्‌त्वाद् ङ्परे णौ। अजीगणत्। अजगणत्। रच प्रयत्ने। रचयति। अररचत्। कल गतौ सं ख्याने च। कलयति। अचकलत्। मह पूजायां। महयति। स्तूच पै शुन्ये। स्तूचयति। असुस्तूचत्। अघोप देशात्वान्न षः॥ कुमार क्रीडायां। कुमारयति। अचुकुमारत्। ऊन परिहाने। ऊनयति। औः पुय णजी ति सूत्रे पयोरिति वक्तव्ये वर्गप्रत्याहारजग्रहो लिंगं [illegible] णि चि अच आदेशो न द्वित्वे कर्त्तव्ये। यत्र द्वित्व का व्याप्ता सोत्तरखंडस्याद्यो च्प्रक्रियायां परिणिष्ठितरूपे वा अवर्णो भ्य तेतत्रैवायं निषेधः। ज्ञापकस्य सजातीयापेक्षत्वात्। तेनाऽचिकीर्त्तदित्यादि सिद्धं। प्रकृते तु नश तेद्दस्य द्वित्वं॥ ततउत्तरखंडे अघोपः॥ औननत्। ध्वन शब्दे। ध्वनयति। अदध्वनत्। सूत्र वेष्टने स्सूत्रयति। मूत्र प्रस्रवणे। मूत्रयति। अदंतत्वसामर्थ्याण्णिज्विकल्पः॥ आगर्वीदात्मनेपदिनः॥ प दगतौ। पदयते। अपपदत। गृह ग्रहणे। गृहयते। मृग अन्वेषणे। मृगयते। स्सूर वीर विक्रांतौ॥ सू रयते। वीरयते। गर्व माने। गर्वयते॥ इति चुरादिः॥ स्वतंत्रः कर्त्ता॥ क्रियायां स्वातंत्र्येण विवक्षितोर्थः

मन्नाम

कर्त्ता स्यात्। तत्प्रयोजको हेतुश्च। कर्तुः प्रयोजको हेतुसंज्ञः कर्तृसंज्ञश्च। हेतुमति च। प्रयोजकव्यापारे प्रेरणा-
दौ वाच्ये धातोर्णिच्॥ भवन्तं प्रेरयति भावयति। ओः पुयण्ज्यपरे॥ सनि परे यदङ्गं तदवयवस्या-
भ्यासोतः इत्स्यात् पवर्गयण्जकारेष्ववर्णपरेषु परतः॥ अबीभवत्। अपीपवत्। मूङ्। अमी-
मवत्। अयीयवत्। अरीरवत्। अलीलवत्। अजीजवत्। पुयण्जीति किं। तुनावयिषति। अप-
रे किं। बुभूषति। स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा॥ एषामभ्यासोकारस्येत्वं वा सति
अवर्णपरे धात्वक्षरे परे। असिस्रवत्। असुस्रवत्। इत्यादि। अवर्णपरे किं। सुस्रूषते॥ णि-
जंतात् णिच्। परत्वादिड्वौ प्राप्ता यासत्यां ण्यल्लोपा वियङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेन
ति णिलोपः। चोरयति णौ चङीति ह्रस्वः॥ दीर्घो लघोरित्यभ्यासदीर्घः। न चाग्लोपित्वाद्ध्मोरप्यसं-
भवः। एणाद्द्वति निर्देशात्। अचूचुरत्। टुओश्वि गतिवृद्ध्योः। णौ च संश्चङोः। सन्परे चङ्परे णौ श्वयतेः सं-
प्रसारणं वा। संप्रसारणं तदाश्रयं च कार्यं बलवदिति वचनात् संप्रसारणं। अशूशवत्। अलघुत्वान्न दीर्घः।
अशिश्वियत्। ष्टिवुसिवुसहां चङि॥ उपसर्गस्थान्निमित्तादेषां सस्य षो न स्याच्चङि। अवातस्तंभत्। पर्य